तर्क संग्रह
(मास्टर खिलाड़ी लाल
जी कृत)

'मास्टर' मणिमालाया एकविंशति संख्यको मणिः (न्यायविभागे १)

॥ श्रीः ॥

श्रीमदन्नम्भट्टविरचितः

तर्कसंग्रहः ।

न्यायबोधिनी-पदकृत्य-विषमस्थलटिप्पणी-भाषाटीका-प्रश्नपत्रसमन्वितः ।

प्रथमपरीक्षोपयोगि-सर्वोत्तमं संस्करणम् ।

प्रकाशकः—

मास्टर खेलाड़ीलाल ऐण्ड सन्स

संस्कृत बुकडिपो,

कचौड़ीगली, बनारस सिटी ।

Tarka Sangraha

Annam Bhatta

Master Manimala series No. 21 (Nyaya Section 1)

THE
Tarka Sangraha
of
Annam Bhatta

With

The commentaries Nyayabodhini of
Pandit Govardhana and Padakritya of
Pandit Chandraja Singh.

Commentated with Explanatory notes on difficult portions
BY
PANDIT KANAKA LAL SHARMA.

Edited with the Hindi translation and G. S. College Examination Papers from 1900 A.D. to 1937 A.D.
BY
Shri Mannalal 'Abhimanyu' M. A.

PUBLISHED BY
Master Khelari Lal & Sons,
Proprietors of 'Sanskrit Book Depot'
BENARES.

PUBLISHER:

J. N. Yadava Proprietor, Master Khelarilal & Sons.

Sanskrit Book Depot, Kachaurigali, Benares City.

PRINTER:

N. P. Yadava, Master Printing Works,

Bulanala, Benares City.

SEVENTH EDITION] *Price 6 Annas.* [1937

मास्टर मणिमालाया एकविंशतिसंख्यको मणिः (न्यायविभागे १)

श्रीमदन्नम्भट्टविरचितः

तर्कसंग्रहः ।

पं० गोवर्द्धनकृत-न्यायबोधिनी-
पं० चन्द्रजसिंहकृत-पदकृत्यव्याख्योपेतः ।

ठक्कुरोपनामकपं० श्रीकनकलालशर्मणा
उपयुक्तविषमस्थलटिप्पणीभिः समलंकृतश्च ।

मास्टर प्रिण्टिङ्गवर्क्साभिधयन्त्रालयाधिप—
श्रीमन्नालाल 'अभिमन्यु' एम० ए०-
कृतया हिन्दीटीकया युतः ।

काशीस्थगवर्नमेण्टसंस्कृतकालेजप्रश्नपत्रसमन्वितः ।

[सप्तमं संस्करणम्]

स च
वारारणस्याम्
मास्टर खेलाड़ीलाल ऐराड सन्स
महानुभावैः
'मास्टर प्रिरिटङ्ग वर्क्स' नाम्नि मुद्रणागारे
मुद्रयित्वा प्रकाशितः ।

विक्रमाब्दाः १९९४
सन् 1937

श्रीः

भूमिका

अये विद्वत्कुलकमलदिवाकराः, न्यायाटवीविहरणपञ्चाननाः ! विद्वांसः !! जानन्त्येव भवन्तो यत्परमकारुणिकेन ऋषिप्रवरेणाऽक्षपादेन प्रणीतेषु मूलभूतेषु न्यायशास्त्रेषु म० म० गङ्गेशोपाध्यायेन विभक्तेषु रघुनाथशिरोमणि-जगदीश-मथुरानाथप्रभृतिभिस्तार्किकशिरोमणिभिर्विस्तृतेष्वपि तेषु झटिति बालानां प्रवेशाय कोऽपि ग्रन्थो नेत्यालोच्य परमदयाशीलेन म० म० अन्नम्भट्टेन तर्कसंग्रहनामा ग्रन्थो व्यरचि । एष च ग्रन्थो न्यायवैशेषिकपदार्थसंवलितो बालानामतीवोपयुक्तोऽस्ति, अस्य च व्याख्यानभूता न्यायबोधिनीनाम्नी टीका कीदृशी ग्रन्थयोजनां सम्पादयतीति जानन्त्येव तद्विदः । अस्याश्च पदकृत्यटीकाप्युक्तटीकां सम्यग्योजयति । अथाप्येष महान् हर्षविषयो यदिह परीक्षार्थिनां विद्यार्थिनामुपकाराय विषमस्थलटिप्पणी निर्मिताऽस्ति । एषा च छात्राणां परीक्षायां कीदृशीमुपकृतिं विधास्यतीति प्रशंसनवाक्यमवलोकनोत्तरं तथ्यमतथ्यं वां भविष्यतीत्यलम्पल्लवितेनेति शम् ।

श्रीकनकलालठक्कुरस्य

मैथिलस्य ।

...पयोगि-सर्वोत्तम संस्करण...

तर्कसंग्रहः ।

...पदकृत्य-भाषाटीका-प्रश्नपत्रसमन्वितः ।

...दि विश्वेशं विधाय गुरुवन्दनम् ।
सुखबोधाय क्रियते तर्कसंग्रहः ॥ १ ॥

न्यायबोधिनी ।

...लागमसंचारि [4]श्रीकृष्णाख्यं परं महः ।

...य्येति । ननु विघ्नोपशमनार्थं समाप्त्यर्थञ्च ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च विधानमि-...र्त्तव्यत्वादिहाऽपि. ग्रन्थादौ मङ्गलस्योक्तप्रयोजनसम्पत्त्यर्थमेव ...सङ्गतम् । कृतेऽपि मंगलबाहुल्ये कादम्बर्यादौ विघ्नशान्तिसमाप्त्योरदर्शनात् ... तस्मिन् किरणावल्यादावुभयोर्दर्शनाच्चेति चेन्न । अविगीतशिष्टाचारविषय-...ङ्गलस्य साफल्येन तत्र फलजिज्ञासायां विघ्नध्वंसस्यैव तत्फलत्वात् समाप्तेश्च ...द्द्वारा सिद्धत्वाच्च । न चाऽथाप्युक्तग्रन्थद्वये व्यभिचारस्य तादवस्थ्यमेवेति ... । कादम्बर्यादौ मङ्गलापेक्षया विघ्नस्याऽऽधिक्यात् किरणावल्यादौ चानेकजन्म-...प्रमङ्गलसत्त्वेन समाप्तिदर्शनाच्च । न च मङ्गलस्य कर्तव्यत्वे किम्प्रमाणमिति वाच्यम्? ...प्तिकामो मङ्गलमाचरेदि' ति शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् । तथाहि ...लं सफलं वेदबोधितकर्तव्यताकम्, अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादि-... । अत्रालौकिकेत्युक्तिर्भोजनादौ व्यभिचारवारणाय । अविगीतशिष्टपदोक्तिश्च रात्रि-...श्राद्धादौ व्यभिचारवारणाय । 'न कुर्यान्निष्फलं कर्मे' ति शिष्टोक्त्या जलताडनादेर...निषिद्धत्वादिति भावः ।

२ तर्क्यन्ते-प्रमितिविषयीक्रियन्ते-इति तर्का द्रव्यादिसप्तपदार्थास्तेषां सं... षष्ठीतत्पुरुषः ।

३ अखिलागमेति । अखिलाश्च ते आगमाश्चेत्यखिलागमास्तेषु सञ्चरितुं ...मस्येति अखिलागमसञ्चारि । वाच्यत्वसंसर्गेणाऽऽगमेषु वर्तमानत्वं ह्यागमसञ्चा...

४ श्रीकृष्णाख्यमिति । श्रीकृष्ण इत्याख्या संज्ञा यस्य तच्छ्रीकृष्णाख्यं संज्ञकमित्यर्थः ।

प्रश्नः—तर्कसंग्रह इत्यत्र कः समासः? (१९१९)

ध्यात्वा गोवर्धनसुधीस्तनुते न्याय[१]बोधिनीम् ॥ १ ॥

[२]चिकीर्षितस्य ग्रन्थस्य निर्विघ्न[३]परिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ [४]निबध्नाति-निधायेति ॥१॥

पदकृत्यम् ।

श्रीगणेशं नमस्कृत्य पार्वतीशंकरं परम् ।
मया चन्द्रजसिंहेन क्रियते पदकृत्यकम् ॥ १ ॥
यस्मादिदमहं मन्ये बालानामुपकारकम् ।
तस्माद्धितकरं वाक्यं वक्तव्यं विदुषा सदा ॥२॥

विश्वेशं=जगत्कर्त्तारं श्रीसाम्बमूर्त्तिं, हृदि=मनसि, निधाय=नितरां धारयित्वा, गुरुवन्दनं च विधाय-कृत्वेत्यर्थः । बालेति । अत्राऽधीतव्याकरणकाव्यकोशानधीतन्यायशास्त्रो [५]बालः । व्यासादावतिव्याप्तिवारणायाऽनधीतन्यायेति । स्तनन्धयेऽतिप्रसक्तिवारणायाऽधीतव्याकरणेति । सुखेति । सुखेन=अनायासेन, बोधाय=पदार्थतत्त्वज्ञानायेत्यर्थः । तर्क्यन्ते-प्रमितिविषयीक्रियन्ते-इति तर्काः-द्रव्यादिपदार्थास्तेषां संग्रहः=संक्षेपेणोद्देश-लक्षण-परीक्षाः यस्मिन् स ग्रन्थः । नाममात्रेण वस्तुसंकीर्तनमुद्देशः । यथा 'द्रव्यं' 'गुण' इति ! [६]असाधारणधर्मो लक्षणम् । यथा गन्धवत्त्वं पृथिव्याः । लक्षि-

---

१ न्यायबोधिनीमिति । न्यायान् न्यायशास्त्रस्थपदार्थान् बोधयितुं शीलमस्या व्याख्यायाः सा तथोक्ता तान्तथोक्ताम् ।

२ चिकीर्षितस्येति । कर्तुमिष्टश्चिकीर्षितस्तस्य कर्तृवृत्तिव्यापारेच्छाविषयीभूतस्य ग्रन्थस्येत्यर्थः ।

३ निर्विघ्नेति । विघ्नान्निष्क्रान्तं निर्विघ्नं निर्विघ्नं परिसमाप्तिर्निर्विघ्नपरिसमाप्तिः सोऽर्थः प्रयोजनं यस्य तत् निर्विघ्नपरिसमाप्त्यर्थम् । इष्टदेवताया नमस्कार आत्मास्वरूपं यस्य तदिष्टदेवतानमस्कारात्मकम् । इष्टदेवताप्रणामरूपमित्यर्थः ।

४ निबध्नातीति । ग्रन्थकोटिप्रवेशानुकूलव्यापारो हि निबध्नातेरर्थः ।

५ व्याकरण-काव्य-कोशविषयकसम्यग्ज्ञानवत्त्वे । सति न्यायशास्त्रविषयकज्ञानशून्यत्वं बालत्वमिति लक्षणं पर्यवसितम् ।

६ असाधारणधर्म इति । धर्मेऽसाधारणत्वम्-असाधारणधर्मत्वं वा. अन्यूनाऽनतिरिक्तवृत्तित्वरूपम्बोध्यम् ।

स्य लक्षणं सम्भवति न वेति विचारः-परीक्षा । अत्रोद्देशस्य ज्ञानं फलं, लक्षणस्येतरभेदज्ञानं, परीक्षाया लक्षणे दोषपरिहार ति मन्तव्यम् ॥

टी०—हृदय में परमेश्वर को स्थापित (अर्थात् ध्यान) करके और गुरु की वन्दना करके बालकों के सुखपूर्वक बोध के निमित्त तर्कसंग्रह नामक ग्रन्थ बनाया जाता है ॥१॥

पदार्थाः कति ? कानि च तेषां नामानि ?—

द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः॥

(न्या०) अथ पदार्थान्[3] विभजते—द्रव्येति । तत्र 'सप्त' ग्रहणं-पदार्थत्वं [4]'द्रव्यादिसप्तान्यतमत्वव्याप्य'मिति व्याप्तिलाभाय । ननु

---

१ ननु—

'विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम् ।
विनाऽनुबन्धं ग्रन्थादौ मंगलं नैव शस्यते ॥'

इत्यभियुक्तोक्त्या ग्रन्थादावनुबन्धचतुष्टयप्रदर्शनस्यावश्यकत्वात्तद्दर्शयति—द्रव्य-गुणेत्यादिना । तथा च द्रव्यादिसप्तपदार्था विषयाः । तज्ज्ञानं प्रयोजनम् । तज्जिज्ञासुरधिकारी । प्रतिपाद्यप्रतिपादकभावः सम्बन्धः स चाऽनेकधा विषय-ग्रन्थयोः प्रतिपाद्यप्रतिपादकभावरूपः । ग्रन्थाधिकारिणोश्च ज्ञातृज्ञेयभावस्वरूपः । अत्र ह्यनु-बन्धत्वं नाम ग्रन्थप्रवृत्तिप्रयोजकज्ञानविषयत्वम् ।

२ सप्त पदार्था इति । ननु पदार्थत्वावान्तरधर्मपुरस्कारेण धर्मिप्रतिपादनादेव सप्तत्वस्य लब्धौ सप्तग्रहणं व्यर्थमिति चेन्न । तस्याऽधिकसंख्यानिषेधसिद्धिफलकत्वेन सार्थक्यात् । पदार्थसामान्यलक्षणञ्च, पदस्याऽर्थः पदार्थ इति व्युत्पत्या अभिधेयत्व-रूपम्बोध्यम् ।

३ विभजत इति । स्वसमभिव्याहृतपदार्थतावच्छेदकमिथोविरुद्धयावद्धर्मप्रकार-कज्ञानानुकूलव्यापारो हि विभजतेरर्थः । स्वं विभजतिस्तत्समभिव्याहृतपदं पदार्थपदं तदर्थतावच्छेदकमिथोविरुद्धयावद्धर्मो द्रव्यत्वादिस्तत्प्रकारकज्ञानं द्रव्यगुणकर्मेत्याकारकं तदनुकूलव्यापारो हि द्रव्यगुणकर्मेति शब्दप्रयोगरूप इति समन्वयः ।

४ द्रव्यादिसप्तान्यतमत्वञ्च । द्रव्यादिसप्तपदार्थभेदकूटविशिष्टभिन्नत्वम्बोध्यम् । द्रव्यादिभेदानां प्रत्येकप्रसिद्धानां सप्तानां कुत्राऽप्यसद्भावात्ताद्दृश्यभेदसप्तकत्वावच्छिन्ना-ऽभावस्य सर्वत्र सद्भावान्न दोष इति भावः ।

प्रश्नः—पदार्थाः कति, कति च पदार्थानामवान्तरभेदाः ? (१९३५)

शक्तिपदार्थस्याऽष्टमस्य सत्त्वात्कथं सप्तैवेति ? तथा हि—वह्निसंयुक्तेन्धनादौ सत्यपि—मणिसंयोगे दाहो न जायते, तच्छून्येन तु जायते। अतो 'मणिसमवधाने शक्तिर्नश्यति, मण्यभावदशायां दाहानुकूला शक्तिरुत्पद्यते'—इति कल्प्यते, तस्माच्छक्तिरतिरिक्तः पदार्थ इति चेन्न। [1]मणेः प्रतिबन्धकत्वेन, [2]मण्यभावस्य कारणत्वेनैव निर्वाहे—मणिसमवधानाऽसमवधानाभ्यामनन्तशक्ति-तद्ध्वंस-तत्प्रागभाव—कल्पनाया अन्याय्यत्वात्। तस्मात्सप्तैवेति सिद्धम्॥

टी०—द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, अभाव ये ७ पदार्थ हैं।

कति द्रव्याणि ? कानि च तानि ?—

तत्र द्रव्याणि—

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव॥

(न्या०) [3]द्रव्याणि विभजते—पृथिवीति। नन्वन्धकारस्य दशमद्रव्यस्य सत्त्वात्कथं नवैवेति ? तथा[4] हि—'नीलं तमश्चलती'ति

१ मणेः प्रतिबन्धकत्वेनेति। न केवलं चन्द्रकान्तमणेरेव प्रतिबन्धकत्वमपि तु सूर्यकान्तमण्यभावविशिष्टचन्द्रकान्तमणेः प्रतिबन्धकत्वमित्यर्थः। कार्याऽकार्याऽनुकूलधर्माऽन्यतरविघटकत्वमेवाऽत्र प्रतिबन्धकत्वमित्यर्थः।

२ मण्यभावस्येति। सूर्यकान्तमण्यभावविशिष्टचन्द्रकान्तमण्यभावस्येत्यर्थः।

३ द्रव्याणि विभजत इति। अत्रापि विभजतेः पूर्वोक्त एवार्थो बोध्यः।

४ तथा हीति। तदुक्तम्—

'तमः खलु चलं नीलं परापरविभागवत्।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति'॥ इति॥

प्रश्नः १—इन्द्रियाणां मध्ये कस्येन्द्रियस्य कुत्रान्तर्भावः कृतः ? (१९११)

प्रश्नः २—केषामिन्द्रियाणां सत्ता ग्राहकत्वम् ? (१९११)

प्रश्नः ३—सावयवद्रव्याणि निरवयद्रव्याणि च कानि ? (१९२६)

प्रश्नः ४—द्रव्यस्य किं लक्षणम्, अन्धकारस्य तल्लक्षणाक्रान्तत्वं वर्तते न वा ? वर्तते चेत्कथं नवैव द्रव्याणि, न वर्तते चेत्कुत्रान्तर्भावः? इति स्पष्टं वाच्यम् (१९३२)

प्रश्नः ५—पृथिव्यादीनां नवानां द्रव्याणां प्रत्येकं लक्षणं मूलकृताभिहितं प्रदर्शनीयम् ? (१९३४)

प्रतीतेर्नीलरूपाश्रयत्वेन, क्रियाश्रयत्वेन च द्रव्यत्वं सिद्धम् । न च क्लृप्तद्रव्येष्वन्तर्भावात्कुतो दशमद्रव्यत्वमिति वाच्यम्; आकाशादिपञ्चकस्य, वायोश्च नीलरूपत्वान्न तेष्वन्तर्भावः, तमसो निर्गन्धत्वान्न पृथिव्यामन्तर्भावः, जलतेजसोः शीतोष्णस्पर्शवत्त्वान्न तयोरन्तर्भावः, तस्मात्तमसो दशमद्रव्यत्वं सिद्धमिति चेन्न, तेजोऽभावरूपत्वेनैवोपपत्तावतिरिक्तत्कल्पनायां मानाभावात् । न[1] च विनिगमनाविरहाद्तेज एव तमोऽभावस्वरूपमस्त्विति वाच्यम्, तेजसोऽभावस्वरूपत्वे सर्वानुभूतोष्णस्पर्शाश्रयद्रव्यान्तरकल्पने गौरवात् । तस्मात्—उष्णस्पर्शगुणाश्रयतया तेजसो द्रव्यत्वं सिद्धम् । तमसि नीलत्वा[2]दिप्रतीतिस्तु भ्रान्तिरेव, दीपाऽपसरणक्रियाया एव तत्र भानात् ।

(प०) तत्रेति । तत्र-सप्तपदार्थमध्ये इत्यर्थः । 'द्रव्याणि नवैवे'-त्यन्वयः । एवं 'तत्रे'ति पदं 'चतुर्विंशतिर्गुणाः' इत्यादिनाऽप्यन्वेति । [3]द्रव्यत्वजातिमत्त्वं, गुणवत्त्वं, समवायिकारणत्वंवाद्रव्यसामान्यलक्षणम्।

टी०—उन (पदार्थों) में पृथिवी, जल, तेज, वायु, आकाश, काल, दिशा, आत्मा और मन-ये ही नौ द्रव्य हैं ।

कति गुणाः ? के च ते ?—

रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-

१ न च विनिगमनाविरहादिति । एकत्र पक्षपातिनी युक्तिर्विनिगमना तस्या विरहादभावादित्यर्थः ।

२ आदिशब्दाच्चलनस्य ग्रहणम् ।

३ द्रव्यत्वजातिमत्त्वमिति । ननु प्रथमलक्षणे लक्षण-लक्ष्यतावच्छेदकयोरभिन्नत्वादुद्देश्यतावच्छेदक-विधेययोरैक्यान्न शाब्दबोधाऽनुमित्योरुपपत्तिरतो द्वितीयलक्षणादरः । अत्रापि उत्पत्तिकालावच्छिन्ने घटादावव्याप्तिरतस्तृतीयलक्षणादर इति भावः ।

प्रश्नः १—केषां गुणानां नवद्रव्यवृत्तित्वम ? (१९१०, १९१५)

प्रश्नः २—गुणानां कियन्तो भेदाः? के च ते? जीवात्मनि के गुणा वर्तन्ते?(१९३६)

सुख-दुःखे-च्छा-द्वेष-प्रयत्न-धर्मा-ऽधर्म-संस्काराश्चतुर्विंश-तिर्गुणाः ॥

टी०—रूप, रस, गन्ध, स्पर्श, संख्या, परिमाण, पृथक्त्व, संयोग, विभाग, परत्व, अपरत्व, गुरुत्व, द्रवत्व, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म और संस्कार—ये चौबीस गुण हैं।

कियन्ति कर्माणि ? कानि च तानि ?—

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि कर्माणि ॥

१ गुणा इति। गुणत्वजातिसिद्धिर्यथा—द्रव्य-कर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात् रूपत्वादेः सत्ताया वा न्यूनातिरिक्तदेशवृत्तित्वान्नाऽवच्छेदकत्वमतश्चतुर्विंशत्यनुगतमवच्छेदकं किञ्चिद्वाच्यं तदेव गुणत्वमिति गुणत्वजातिसिद्धिः। कर्मान्यत्वे सति द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं गुणत्वमिति सामान्यलक्षणम्। द्रव्यत्वजातिसिद्धिप्रकारश्चेत्थम्—समवायेन कार्यत्वावच्छिन्नं प्रति या तादात्म्येन कारणता सा किञ्चिद्धर्मावच्छिन्नेति स धर्म एव द्रव्यत्वजातिरिति। अनुमानप्रयोगश्चात्रत्यो यथा—समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्न—कार्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्ना या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिष्ठकार्यतानिरूपितदण्डनिष्ठकारणतावदिति। अत्राऽनुमानप्रयोगे—कार्यत्वकुक्षौ यावत्कार्यप्रवेशे गौरवात् कार्यध्वंसेऽपि कार्यत्वस्य सत्त्वाव तत्र समवायेन कार्यताया अभावादतिप्रसक्तत्वेनाऽवच्छेदकत्वाऽसम्भवादिति कार्यदले संयोगपदं निवेशनीयम्। तथा चायमनुमानप्रयोगः – समवायसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नकार्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्नेति कारणतावच्छेदक एव द्रव्यत्वजातिरिति। अथापि विभुद्वयस्य संयोगंवादिनाम्मते संयोगत्वावच्छिन्नकार्यताया अप्रसिद्धिः—विभूनामिव तत्संयोगस्याऽपि नित्यत्वेनाऽतिप्रसक्तिश्चेति कार्यदले विभागपदं निवेशनीयम्। तथा चाऽनुमानप्रयोगः—समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिता कारणता किञ्चिद्धर्मावच्छिन्नेति सर्वं समञ्जसम्।

प्रश्नः १—कर्म कतिविधम् (१९१९)

प्रश्नः २—उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणानां लक्षणानि प्रदर्श्यन्ताम्(१९३१)

प्रश्नः ३—कर्मणः किं लक्षणम् ? कतिविधं च तत् ? के च ते भेदाः ? (१९३३)

प्रश्नः ४—प्रसारणाकुञ्चनयोः कर्मणोर्लक्षणे अभिधीयताम् (१९३४).

टी०—उत्क्षेपण (ऊपर फेंकना),अपक्षेपण (नीचे फेंकना), आकुञ्चन (समेटना) प्रसारण (फैलाना) और गमन (चलना)—ये पाँच कर्म हैं।

सामान्यं कतिविधम् ?—

परमपरं चेति द्विविधं सामान्यम् ॥

(प०) परमपरं चेति । परसामान्यमपरसामान्यमित्यर्थः । परत्वं चाधिकदेशवृत्तित्वम् । अपरत्वं-न्यूनदेशवृत्तित्वम् ॥

टी०—पर और अपर ये दो सामान्य हैं।

कियन्तो विशेषाः ?—

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ॥

टी० - विशेष केवल नित्य द्रव्यों में रहते हैं और अनन्त हैं।

समवायः कतिविधः ?—

समवायस्त्वेकं एव ।

टी० —समवाय एक ही है।

अभावः कतिविधः ?—

अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ॥ इत्युद्देशग्रन्थः ॥

टी०—अभाव चार प्रकार का होता है,-प्रागभाव, प्रध्वंसाभाव, अत्यन्ताभाव और अन्योन्याभाव।

---

१ विशेषोस्त्विति । अत्र विशेषत्वं स्वतो व्यावर्तकत्वं निरवयवद्रव्यव्यावृत्यर्थञ्च तत्स्वीकरणम् ।

२ समवायस्त्विति । समवायत्वञ्च नित्यसम्बन्धत्वम् ।

३ अभाव इति । प्रतियोगिज्ञानाधीनज्ञानविषयत्वञ्चाऽभावत्वम् । समवायैकार्थसमवायान्यतरसम्बन्धेन सत्तावत्वमेव भावत्वम् ।

प्रश्नः १—अभाव. कतिविधः ? (१९२६)

प्रश्नः १—विशेषपदार्थः कुत्र वर्तते ? तस्य लक्षणमभिधाय विशदीक्रियताम् (१९३४)

पृथिव्याः किं लक्षणम् ? कति च भेदाः ?—

तत्र-गन्धवती पृथिवी । सा द्विविधा-नित्याऽनित्या च । नित्या-परमाणुरूपा । अनित्या-कार्यरूपा । पुनस्त्रिविधा-शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं[1] घ्राणं-नासाग्रवर्ति । विषयो-मृत्पाषाणादिः ॥

(न्या०) गन्धवतीति । [2]गन्धवत्त्वं पृथिव्या लक्षणम् । लक्ष्या-पृथिवी । पृथिवीत्वं-लक्ष्यतावच्छेदकम् । यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः । यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः । तथा च लक्ष्यतावच्छेदकं पृथिवीत्वं चेत्-लक्ष्यता पृथिवीत्वावच्छिन्ना । [3]गन्धसमानाधिकरणद्रव्यत्व[4]व्याप्यजातिमत्त्वं पृथिव्या लक्षणम् । एवं शीतस्पर्शवत्त्वादिलक्षणेषु-जलादीनां लक्ष्यता, जलत्वादीनां लक्ष्यतावच्छेदकत्वं च बोध्यम् ॥

(प०) तदेव हि लक्षणं यत्-अव्याप्त्यतिव्याप्त्यसंभवरूपदोषत्रयशून्यम् । यथा गोः सास्नादिमत्त्वम् । अव्याप्तिश्च-लक्ष्यैकदेशाऽ-

१ गन्धग्राहकमिति । गन्धविषयकसाक्षात्कारजनकम् ।

२ गन्धवत्त्वमिति । गन्धवती पृथिवीत्यत्र गन्धवत्व-पृथिवीत्वयोर्द्वयोरप्यैक्येनोद्देश्यविधेययोरनिर्णयादाह गन्धत्वं पृथिव्या लक्षणमिति । अत्राधिकरणार्थकमतुवन्तत्व प्रत्ययविधानाद्गन्धवत्वमित्यस्य गन्धाधिकरणत्वमर्थः । तच्च समवायेन बोध्यम् । समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिनाधेयतानिरूपिताधिकरणतावत्वमिति निष्कर्षः ।

३ उत्पत्तिकालावच्छेदेन घटादावव्याप्तेराह-गन्धेति ।

४ व्याप्यत्वमिति । व्याप्यत्वं न्यूनदेशवृत्तित्वं द्रव्यत्वाभावसामानाधिकरण्ये सति द्रव्यत्वाभाववदवृत्तित्वरूपं, तेन द्रव्यत्वस्य द्रव्यत्वव्याप्यत्वेऽपि न क्षतिः । अव्यापकत्वं वा निवेश्यम्, तस्य गुणत्वादिसाधारण्येऽपि तत्र गन्धसमानाधिकरणत्वाभावान्नातिव्याप्तिः ।

प्रश्नः १—पृथिव्याः किं लक्षणं, पार्थिवमिन्द्रियं च किम् ? (१९०६)
प्रश्नः २— ,, ,, कतिविधा च सा ? (१९१७)

वृत्तित्वम् । अत एव गोर्न कपिलत्वं लक्षणं, तस्याव्याप्तिग्रस्तत्वात् । अतिव्याप्तिश्च-लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वम् । अत एव गोर्न शृङ्गित्वं लक्षणं, तस्यातिव्याप्तिग्रस्तत्वात् । असम्भवश्च लक्ष्यमात्राऽवृत्तित्वम् । यथा गोरेकशफवत्त्वं न लक्षणं, तस्यासम्भवग्रस्तत्वात् । **नित्येति** । ध्वंसभिन्नत्वे सति ध्वंसाऽप्रतियोगित्वं नित्यत्वम् । ध्वंसेऽतिव्याप्तिवारणाय 'ध्वंसभिन्ने'ति विशेषणम् । घटादावतिव्याप्तिवारणाय विशेष्यदलम् । ध्वंसप्रतियोगित्वं, [१]प्रागभावप्रतियोगित्वं वाऽनित्यत्वम् । [२]यद्भोगायतनं तदेव शरीरं, चेष्टाश्रयो वा । **इन्द्रियमिति** । चक्षुरादावतिव्याप्तिवारणाय 'गन्धग्राहक'मिति । कालादावतिप्रसक्तिवारणाय-'इन्द्रिय'मिति । **विषय इति** । शरीरेन्द्रियभिन्नत्वे सत्युपभोगसाधनं विषयः । शरीरादावतिव्याप्तिनिरासाय सत्यन्तम् । परमाण्वादावतिव्याप्तिवारणाय विशेष्यदलम् । कालादिवारणाय 'जन्यत्वे सती'त्यपि बोध्यम् ॥

टी०—उन (नौ द्रव्यों) में से गन्धवाले द्रव्य का नाम पृथिवी है । वह दो प्रकार की है—नित्य और अनित्य । परमाणु रूप पृथिवी नित्य है और कार्यरूप पृथिवी अनित्य है । वह (कार्यरूप पृथिवी) फिर शरीर, इन्द्रिय और विषय के भेद से तीन प्रकार की है । (जैसे) हम लोगों का शरीर । गन्ध को ग्रहण करने वाला घ्राणेन्द्रिय नासिका के अगले भाग पर रहता है वही इन्द्रिय रूप पृथिवी है । मिट्टी पत्थर आदि को विषय रूप पृथिवी कहते हैं ।

---

१ ननु न्यायनये ध्वंसे ध्वंसप्रतियोगित्वाऽभावात्तस्यानित्यत्वं न स्यादत आह—प्रागभावप्रतियोगित्वमिति । तत्रापि प्रागभावप्रतियोगित्वाभावादनित्यत्वं न स्यादतो ध्वंसप्रागभावान्यतरप्रतियोगित्वमनित्यत्वमित्यवसेयम् ।

२ यद्भोगायतनमिति । भोगायतनमित्यस्याऽऽत्मनो भोगस्थानमित्यर्थः । शरीरमित्यस्य सुखदुःखान्यतरसाक्षात्काराऽवच्छेदकमित्यर्थः । ननु देश-कालयोरपि सुखादिसाक्षात्कारावच्छेदकत्वेन तत्रापि शरीरत्वव्यवहारः स्यादत आह—चेष्टाश्रयो वेति । ननु हिताऽहितपरिहारार्थक्रियाविशेषस्यैव चेष्टाशब्दार्थत्वेन तस्याश्च शरीरैकदेशे हस्तपादादावपि सत्त्वेन तत्रापि शरीरत्वातिप्रसक्त्या तल्लक्षणऽस्यावयवित्वे सतीत्यस्यापि विशेषणत्वेन अन्त्यावयवित्वे सति चेष्टाश्रयत्वं हि शरीरलक्षणं फलितम् । अन्त्यावयवित्वार्थस्तु—द्रव्यान्तरानारम्भकद्रव्यत्वरूपो बोध्यः ।

जलस्य किं लक्षणम् ? कति च भेदाः ?—

[1]शीतस्पर्शवत्य आपः। ता द्विविधाः-नित्याः, अनित्याश्च। नित्याः-परमाणुरूपाः। अनित्याः-कार्यरूपाः। पुनस्त्रिविधाः-शरीरेन्द्रियविषयभेदात्। शरीरं-वरुणलोके। इन्द्रियं-रसग्राहकं रसनं-जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।

(प०) **शीतेति।** तेज-आदावतिव्याप्तिवारणाय 'शीते'ति। आकाशवारणाय 'स्पर्शे'ति। [2]कालादावतिप्रसक्तिवारणाय 'समवायसम्बन्धेने'ति पदं देयम्। **इन्द्रियमिति।** त्वगादावतिव्याप्तिवारणाय 'रसग्राहक'मिति। [3]रसनेन्द्रियरससंनिकर्षादावतिव्याप्तिनिरासाय-'इन्द्रिय'मिति। **सरिदिति।** आदिना तडाग[4]हिमकरकादीनां संग्रहः।

टी०—जिसमें शीतल स्पर्श रहे, उसका नाम जल है। वह दो प्रकार का होता है—नित्य और अनित्य। परमाणुरूप जल नित्य है, कार्यरूप जल अनित्य है। फिर वह (कार्यरूप जल) शरीर इन्द्रिय और विषय भेद से तीन प्रकार का होता है। वरुण लोकवासियों का शरीर जलका है इसको ग्रहण करने वाला इन्द्रिय 'रसना' है वही जलीय इन्द्रिय है और जिह्वाके अग्रभागपर रहता है। नदी, समुद्र आदि विषय रूप जल है।

तेजसः किं लक्षणम् ? के च भेदाः ?—

[5]उष्णस्पर्शवत्तेजः। तच्च द्विविधं-नित्यमनित्यं च।

१ शीतेति। शीतस्पर्शवत्त्वं ह्यपां लक्षणम्।

२ कालादाविति। अत्रादिपदेन दिक्परिग्रहः।

३ रसनेन्द्रियस्य रसेन साकं यः सन्निकर्षः संयुक्तसमवायस्तद्वारणायेत्यर्थः। अत्रादिपदेन दिक्कालयोर्ग्रहणम्।

४ अत्रादिपदेन वर्षाबिन्दुग्रहणम्।

५ उष्णस्पर्शवत्त्वं च तेजस्त्वम्।

प्रश्नः १—अपां लक्षणं तद्भेदांश्च प्रदर्शयत (१९०५, १९०८, १९२६)

प्रश्नः १—तेजसो लक्षणमुक्त्वा तैजसमिन्द्रियं तल्लक्षणं च ब्रूत। (१९०४, १९१२, १९२३, १९२९)

नित्यं-परमाणुरूपम्, अनित्यं-कार्यरूपम्। पुनस्त्रिविधं-शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं-रूपग्राहकं चक्षुः-कृष्णताराग्रवर्ति। विषयश्चतुर्विधो-भौमदिव्योदर्याऽऽकरजभेदात्। भौमं-वह्न्यादिकम् दिव्यं-अबिन्धनम्-विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादि॥

(प०) उष्णेति। जलादावतिव्याप्तिनिरासाय'उष्णे'ति। कालादावतिप्रसङ्गवारणाय 'समवायसम्बन्धेने'ति पदं देयम्। इन्द्रियमिति। घ्राणादावतिव्याप्तिवारणाय 'रूपग्राहक'मिति। [2]कालादावतिव्याप्तिनिरसनाय'इन्द्रिय'मिति। 'भेदा'दिति पदं-प्रत्येक-[3]मभिसम्बध्यते। भौममिति। आदिपदेन [4]खद्योतगततेजः प्रभृतेः परिग्रहः। विद्युदादीति। आदिना [5]अर्कचन्द्रादीनां परिग्रहः। भुक्तेति। भुक्तस्य=अन्नादेः, पीतस्य-जलस्य-परिणामो=जीर्णता, तस्य हेतुरुदर्यमित्यर्थः। सुवर्णेति। आदिना-[6]रजतादिपरिग्रहः।

---

१ अद्भिरिन्ध्यते प्रकाश्यते इत्यबिन्धनम्।

२ जन्यवस्तुमात्रं प्रति कालादीनां हेतुत्वात् तत्र रूपादिग्राहकत्वस्यापि सत्वादति-प्रसक्तामतिव्याप्तिम्परिहर्तुं ह्यत्रेन्द्रियपदोपादानम्।

३ प्रत्येकमिति। द्वन्द्वान्ते द्वन्द्वमध्ये द्वन्द्वादौ वा श्रूयमाणपदं प्रत्येकमभिसम्बध्यत इति नियमादत्र द्वन्द्वान्ते श्रूयमाणभेदपदस्य प्रत्येकमभिसम्बन्ध इति भावः।

४ खद्योतगतेति। अत्रत्यप्रभृतिपदं प्रकाशयुक्तौषधिपरिग्राहकम्।

५ रविचन्द्रादीति। अत्रादिना तारागणपरिग्रहः।

६ रजतादेरिति। अत्रादिना सर्वस्य शेषलोहपदवाच्यस्य ग्रहणम्। तदुक्तममर-कोशे—"सर्वञ्च तैजसं लौहमिति।"

स्मृतिरप्यत्र प्रमाणं तथा हि—

"सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु।

प्रश्नः २—तेजः कतिविधम्? (१९१८)

टी०—उष्ण स्पर्श वाली वस्तुका नाम 'तेज' है। वह तेज दो प्रकार का है-नित्य और अनित्य। परमाणु रूप तेज नित्य है, कार्य रूप तेज अनित्य है। शरीर, इन्द्रिय और विषय के भेद से यह (अनित्य तेज) तीन प्रकार का है। तैजस शरीर आदित्य लोक में है। जिससे रूप का प्रत्यक्ष होता है, वह नेत्र के अन्दर की काली पुतली के अगले भाग में रहने वाला चक्षु तैजस इन्द्रिय है। भौम, दिव्य, उदर्य और आकरज के भेद से तैजस विषय चार प्रकार का होता है। अग्नि आदि भौम तेज है। जिसका अप् (जल) ही इन्धन है, ऐसी बिजली आदि दिव्य तेज है। भोजन पाचन कराने वाला पेट के भीतर का तेज उदर्य है। खान से निकला हुआ सुवर्ण आदि आकरज तेज है।

वायोः किं लक्षणम्? के च ते भेदाः?—

रूपरहितः स्पर्शवान्वायुः। स द्विविधः—नित्योऽनित्यश्च। नित्यः—परमाणुरूपः, अनित्यः-कार्यरूपः। पुनस्त्रिविधः-शरीरेन्द्रियविषयभेदात्। शरीरं-वायुलोके। इन्द्रियं-स्पर्शग्राहकं त्वक्-सर्वशरीरवर्ति। विषयो-वृक्षादि-कम्पनहेतुः। शरीरान्तःसंचारीवायुः—प्राणः। स चैकोऽप्युपाधिभेदात्प्राणाऽपानादिसंज्ञां लभते।

(न्या०) एवं पृथिव्यादित्रिकं निरूप्य वायुं [1]निरूपयति—रूप रहित इति। रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम्। सति सप्तम्या विशिष्टार्थकतया [2]रूपरहितत्वविशिष्टस्पर्शवत्त्वं वायोर्लक्षणम्।

सीस कालायसञ्चैवमष्टौ लौहानि चक्षते'' ॥ इति ॥

रीतिः पित्तलम्। त्रपु रंगमिति तदर्थः।

१ लक्षण-स्वरूप-प्रामाण्याद्यन्यतमप्रकारकज्ञानानुकूलव्यापारो हि निरूपयतेरर्थः। तथा चायं वाक्यार्थो निष्पद्यते—वायुनिष्ठा या विषयता तादृशविषयतानिरूपिका या लक्षण-स्वरूप-प्रामाण्याद्यन्यतमप्रकारिकाऽप्रतिपत्तिः तादृशप्रतिपत्त्यनुकूलो यो व्यापारस्तादृशव्यापारानुकूला या कृतिस्तादृशकृतिमान् ग्रन्थकार इति।

२ सति सप्तम्या बोधितं वैशिष्ट्यं सर्वत्र सामानाधिकरण्येन बोध्यम्।

प्रश्नः १—वायोर्लक्षणं तत्रत्य पदकृत्यप्रदर्शनपुरःसरं प्रदर्शयत। (१९०३-०७)
प्रश्नः २—किं लक्षणको वायुरिन्द्रियत्वं वा कस्मिन्वायौ? (१९१५)
प्रश्नः ३—वायोर्लक्षणमवान्तरभेदपुरस्सरं ब्रूहि (१९२०, १९२८)

विशेषणांशानुपादाने स्पर्शवत्त्वमात्रस्य लक्षणत्वे पृथिव्यादित्रिकेऽतिव्याप्तिः, तद्वारणाय विशेषणोपादानम्। तावन्मात्रोपादाने आकाशादावतिव्याप्तिः, तद्वारणाय विशेष्योपादानम्। अतिव्याप्तिर्नाम—अलक्ष्ये लक्षणसत्त्वम्। यथा—गोः शृङ्गित्वं लक्षणं कृतं चेत्-लक्ष्यभूतगोभिन्नमहिष्यादावतिव्याप्तिः, तत्रापि शृङ्गित्वस्य विद्यमानत्वात्। अव्याप्तिर्नाम-लक्ष्यैकदेशाऽवृत्तित्वम्, लक्ष्यैकदेशे=लक्ष्यतावच्छेदकाश्रयीभूते क्वचिल्लक्ष्ये, लक्षणाऽसत्त्वमव्याप्तिरित्यर्थः। यथा गोर्नीलरूपवत्वं लक्षणं कृतं चेल्लक्ष्यतावच्छेदकाश्रयीभूतश्वेतगवि अव्याप्तिः, तत्र नीलरूपाभावात्। असम्भवो नाम—लक्ष्यमात्रे कुत्रापि लक्षणाऽसत्वम्। यथा गोरेकशफवत्त्वम्। गोसामान्यस्य द्विशफवत्त्वेन एकशफवत्त्वस्य कुत्राप्यसत्त्वात्। अतिव्याप्त्यव्याप्त्यसम्भवानां निष्कृष्टलक्षणानि—[1]लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यम्-अतिव्याप्तिः। अव्याप्तिस्तु—[2]लक्ष्यतावच्छेदकसमानाधिकरणाऽत्यन्ताऽभावप्रतियोगित्वम्। असम्भवस्तु—[3]लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम्।

(५०) रूपेति। घटादिवारणाय विशेषणम्। आकाशादिवारणाय विशेष्यम्। इन्द्रियमिति। चक्षुरादिवारणाय 'स्पर्शग्राहक'मिति। कालादावतिव्याप्तिवारणाय'इन्द्रिय'मिति! वृक्षेति। 'आदि'-पदेन जलादिपरिग्रहः। शरीरान्तरिति। महावाय्वादावतिव्याप्तिवारणाय विशेषणम्। [4]मन आदिवारणाय विशेष्यम्। धनञ्जय-

---

१ यथाऽतिव्याप्तो गोः शृङ्गित्वरूपलक्षणे लक्ष्यतावच्छेदकगोत्वसामानाधिकरण्यं गोत्वावच्छेदकावच्छिन्नप्रतियोगिताको यो महिष्यादौ भेदस्तत्सामानाधिकरण्यमप्यस्तीति लक्षणसमन्वयो जातोऽतिव्याप्तेरिति बोध्यम्।

२ अव्याप्तिलक्षणसमन्वयप्रकारो यथा—गोर्नीलरूपवत्वलक्षणे लक्ष्यतावच्छेदकगोत्वसमानाधिकरणश्वेतगोनिष्ठाऽत्यन्ताभावप्रतियोगित्वस्य सत्त्वादव्याप्तिरिति।

३ असम्भवलक्षणसमन्वयश्चेत्थम्—यथा गोरेकशफवत्त्वरूपलक्षणे लक्ष्यतावच्छेदकगोत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वसत्त्वादसम्भवः।

४ मन आदिवारणायेति। अत्रत्यादिपदेन नाडीपुञ्जग्रहणम्।

'वारणाय-'संचारी'ति । उपाधीति । मुखनासिकाभ्यां निर्गमन-प्रवेशनात्प्राणः, जलादेरधोनयनादपानः, भुक्तपरिणामाय जाठरानलस्य समुन्नयनात्समानः, अन्नादेरूर्ध्वनयनादुदानः, नाडीमुखेषु विततनाद्व्यानः, इति क्रियारूपोपाधिभेदात्तथा व्यवह्रियत इत्यर्थः ।

टी०—जिसमें रूप न हो लेकिन स्पर्श हो वह वायु है । वह (वायु) दो प्रकार का है, नित्य और अनित्य । परमाणुरूप वायु नित्य और कार्यरूप वायु अनित्य है । कार्यरूप अनित्य वायु तीन प्रकार का होता है-शरीर इन्द्रिय और विषय । वायवीय शरीर वायुलोकमें है । वायवीय इन्द्रिय-त्वगिन्द्रिय है, जो सब शरीर में वर्तमान है और जिससे स्पर्श का प्रत्यक्ष होता है । वृक्ष आदिकों को कँपाने वाला वायु विषय है । शरीर के अन्दर सञ्चार करने वाला वायु प्राण है । वह एक होकर भी स्थानरूप उपाधि भेद से प्राण, अपान, समान, उदान, और व्यान (पाँच प्रकार का) होता है ।

आकाशस्य किं लक्षणम् ?—

शब्दगुणकमाऽऽकाशम् । तच्चैकं, विभु, नित्यं च ।

(न्या०) आकाशं [३]लक्षयति—शब्दगुणकमिति । 'गुण'-पदम्-'आकाशे शब्द एव विशेषगुणः' इति द्योतनाय, न त्वतिव्याप्तिवारणाय, समवायेन शब्दवत्त्वमात्रस्य सम्यक्त्वात् । तच्चैकमिति । अनेकत्वे मानाभावादिति भावः । विभ्विति । सर्वमूर्तद्रव्यसंयोगित्वं

१ धनञ्जयेति । धनञ्जयस्य सर्वशरीरव्याप्यत्वेन सञ्चरणान्नास्तीति भावः ।

२ शब्दगुणकमिति । शब्दस्यात्र भट्टनये द्रव्यत्वात्तन्निरासाय गुणपदोक्तिः । अन्यथाऽऽकाशस्य शब्दवत्त्वमात्रलक्षणस्यैव युक्तत्वेन गुणपदोक्तेर्वैयर्थ्यापत्तेरिति भावः । अत्रायं विचारः—आकाशं द्रव्यमित्यत्र किम्मानमिति चेन्न । तत्र शब्दगुणकत्वस्यैव मानत्वात् । तथा हि—शब्दो गुणः अनित्यत्वे सति एकेन्द्रियग्राह्यजातीयत्वाद्रूपवदित्यनुमानेन शब्दस्य गुणत्वसिद्धौ शब्दोऽष्टद्रव्यानाश्रितः श्रोत्रेन्द्रियग्राह्यत्वात् शब्दत्ववदित्यनुमित्या शब्दस्याष्टद्रव्यगुणत्वाभावे च सिद्धे, शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्या नाश्रितत्वे सति गुणत्वादिति परिशेषाऽनुमानादाकाशरूपसिद्धेरिति भावः ।

३ असाधारणधर्मानुकूलव्यापारो हि लक्षयतेरर्थः ।

प्रश्नः १—केषां द्रव्याणां विभुत्वं किं च तदिति ब्रूहि ? (१९१५)

प्रश्नः २—आकाशस्य किं लक्षणं किं तत्र विभुत्वम् ? (१९१६, १९१८)

विभुत्वम्। मूर्तत्वं च क्रियावत्त्वम् । पृथिव्यप्तेजोवायुमनांसि मूर्त्तानि। 'पृथिव्यप्तेजोवाय्वाकाशे'ति पञ्चकं—'भूत'पदवाच्यम् । भूतत्वं नाम—बहिरिन्द्रियग्राह्य[1]विशेषगुणवत्त्वम् ।

(प०) शब्देति । शब्दो गुणो यस्य तत्तथा । असम्भववारणाय'शब्द-गुणो'-भयम् । विभ्विति । [2]सर्वमूर्त्तद्रव्यसंयोगि ।

टी०—जिसका गुण शब्द है उसका नाम है आकाश । वह एक सर्वव्यापक और नित्य है ।

कालस्य किं लक्षणम् ? के च भेदाः ?—

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च ॥

(न्या०) कालं लक्षयति–अतीतेति । व्यवहारहेतुत्वस्य लक्षणत्वे 'घट' इति [4]व्यवहारहेतुभूतघटादावतिव्याप्तिः, तद्वारणाय 'अतीतादी'ति विशेषणोपादानम् ।

(प०) अतीतेति । 'अतीत[5]' इत्यादिर्यो, व्यवहारः-'अती-

---

१ अत्र के ते विशेषगुणा इति जिज्ञासोदये समाधत्ते—

'रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः ।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः॥'

इति वैशेषिका विशेषाः। विशेषगुणत्वञ्च भावनाऽन्यो यो वायुवृत्ति-स्पर्शावृत्तिधर्मसमवायी तदन्यत्वे सति गुरुत्व-जलद्रवत्वान्यगुणत्वरूपम् । अत्र गुणत्वमित्युक्तिर्जात्यादावतिव्याप्तिवारणार्थिका । गुरुत्वेत्या युक्तिस्तु गुरुत्व-नैमित्तिद्रवत्वयोर्व्यावृत्तये बोध्या । सांसिद्धिकद्रवत्वपरिग्रहाय जलपदोपादानम् । संयोगादिव्यावृत्तये सत्यन्तपदोपादानम् । संस्कारत्वधर्ममादाय भावनायामव्याप्तिवारणार्थमाद्यमध्यान्तं सत्यन्तघटकसमवायिविशेषणम् । सत्तादिकमादायाऽसम्भववारणाय स्पर्शसंग्रहाय च स्पर्शावृत्तीति ।

२ परिच्छिन्नपरिमाणवत्त्वस्य क्रियावत्त्वस्य वा मूर्तत्वे गुणेषु तदभावादत्रत्यद्रव्यपदस्य स्पष्टार्थकत्वं निरर्थकत्वं वा बोध्यम्।

३ विभुत्वे सत्यतीतादिव्यवहाराऽसाधारणनिमित्तहेतुत्वं कालत्वमिति कालस्य लक्षणम् ।

४ अभिधानरूपस्फुरणरूपश्चेति व्यवहारस्य द्वैविध्यादभिधानरूपव्यवहाराभिप्रायेण घटपदोक्तिः ।

५ अतीतत्वं नाम वर्तमानध्वंसप्रतियोगित्वम् भविष्यत्वञ्च वर्तमानप्रागभावप्रतियोगित्व रूपं बोध्यम् । वर्तमानोपाधिसम्बन्धत्वं हि वर्तमानत्वम् ।

तो', 'भविष्यन्' 'वर्तमान' इत्यात्मकः, तस्याऽसाधारणहेतुः काल इत्यर्थः। नन्विदं लक्षणमाकाशेऽतिव्याप्तं, व्यवहारस्य शब्दात्मकत्वादिति चेन्न। अत्र 'हेतु'पदेन निमित्तहेतोर्विवक्षितत्वात्। न चैवं कण्ठताल्वाद्यभिघातेऽतिव्याप्तिरिति वाच्यम्, विभुत्वस्यापि निवेशात्।

टी०—अतीत (भूत) आदि व्यवहार का कारण जो द्रव्य है वह काल कहलाता है। वह (काल) एक, सर्वव्यापक और नित्य है।

दिशो लक्षणं भेदश्च—

प्राच्यादिव्यवहारहेतुर्दिक्[1]। सा चैका, नित्या, विभ्वी च॥

(न्या०) दिशो लक्षणमाह—प्राच्येति। उदयाचलसंनिहिता या दिक् सा प्राची। अस्ताचलसंनिहिता या दिक् सा प्रतीची। मेरोः संनिहिता या दिक्सा-उदीची। मेरोर्व्यवहिता या दिक् साऽवाची।

(प०) प्राचीति। 'इयं प्राची' 'इयमवाची' 'इयं प्रतीची' 'इयमुदीची'त्यादिव्यवहाराऽसाधारणं कारणं दिगित्यर्थः। 'हेतुर्दिगि'त्युच्यमाने परमाण्वादावतिव्याप्तिः स्यात्तद्वारणाय-'प्राच्यादिव्यवहारहेतु'रिति। आकाशादिवारणाय 'असाधारणे'त्यपि बोध्यम्।

टी०—पूर्व (पश्चिम, उत्तर, दक्षिण) आदि व्यवहार का कारण जो द्रव्य है वह दिशा कहलाता है। वह एक, नित्य और सर्वव्यापक है।

आत्मनो लक्षणं भेदश्च—

ज्ञानाधिकरणमात्मा[2]। स द्विविधः जीवात्मा[3], पर-

१ प्राच्यादिव्यवहाराऽसाधारणनिमित्तकारणत्वं दिक्त्वम्।

२ समवायेन ज्ञानाधिकरणत्वमात्मत्वमित्यात्मनो लक्षणम्। परमेतल्लक्षणमव्यासमुक्तदशायां ज्ञानोत्पादकात्म—मनः-संयोगाऽभावेन ज्ञानाधिकरणत्वाऽभावादतो ज्ञानसमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वमिति लक्षणं पर्यवसन्नम्।

३ आत्मनि जीवत्वं नाम, समवायेन जन्यज्ञानाधिकरणत्वम्।

प्रश्नः १—आत्मा कतिविधः? (१९१८)

प्रश्नः २—आत्मनो लक्षणं वक्तव्यं, विभागश्च प्रदर्शनीयः। (१९२४, १९२६)

प्रश्नः ३—आत्म-मनसी निरुपणीये। (१९२७)

मात्मा चेति । तत्रेश्वरः—सर्वज्ञः परमात्मा एक एव । जीवस्तु प्रतिशरीरं भिन्नो, विभुर्नित्यश्च ।

(न्या०) आत्मानं [3]निरूपयति—ज्ञानाधिकरणमिति । अधिकरणपदं [4]समवायेन ज्ञानाश्रयत्वलाभार्थम् ॥

(प०) ज्ञानाधिकरणेति । भूतलादिवारणाय-'ज्ञाने'ति । कालादिवारणाय 'समवायेने'त्यपि देयम् । ईश्वर इति । समवायसंबन्धेन नित्यज्ञानवान्-ईश्वरः । जीव इति । सुखादिसमवायिकारणं जीव इत्यर्थः ।

टी०—जिस द्रव्यमें ज्ञान रहता है उसका नाम आत्मा है । वह दो प्रकार का है, एक जीवात्मा और दूसरा परमात्मा । परमात्मा ईश्वर, सर्वज्ञ और एक है । जीवात्मा प्रति शरीरमें भिन्न है, किन्तु व्यापक और नित्य है ।

मनसो लक्षणं भेदश्च—

[5]सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं, परमाणुरूपं, नित्यं च ॥

१ आत्मनि परमत्वञ्च, जगज्जननादिकर्तृत्वम् ।

२ सुखादिभोगवैचित्र्यात्प्रतिशरीरं जीवभेदोऽनुमीयत इति भावः ।

३ अत्रापि लक्षण-स्वरूप-प्रामाण्याद्यन्यतमप्रकारकज्ञानानुकूलव्यापारो निरूपयतेरर्थः

४ अत्र समवायेनेत्यस्यानुपादाने कालेऽपि कालिकसम्बन्धेन ज्ञानस्य सत्त्वादतिव्याप्तिः स्यात्तन्निरासाय तदुपादानमिति भावः ।

५ नीलकण्ठीव्याख्यातृसम्मतं मनसो लक्षणं तु स्पर्शरहितत्वे सति क्रियावत्वरूपम् । इदञ्च लक्षणं मनःसंयोगाद्यतिव्याप्तिवारकेन्द्रियत्वपठितमूलोक्तलक्षणाऽपेक्षयालघुत्वादादृतम् । अस्याऽन्यादृशलक्षणन्तु न्यायबोधिन्यां स्पष्टम् ।

६ ननु मनसो मध्यमपरिमाणवत्वेऽनित्यत्वापत्तिः विभुत्वे च विभुद्वयसंयोगस्याऽनभ्युपगमादात्ममनःसंयोगरूपाऽसमवायिकारणस्याऽभावेन ज्ञानानुपपत्तेराह—परमाणुरूपमिति ।

प्रश्नः १—मनसो लक्षणं तत्रत्य पदानां कृत्यं च दर्शनीयम् ।

(सन् १६०१, १९०८, १९१३, १६२५)

(न्या०) मनो निरूपयति—सुखादीति । उपलब्धिर्नाम साक्षात्कारः । तथा च सुखदुःखादिसाक्षात्कारकारणत्वे सति इन्द्रियत्वं मनसो लक्षणम् । 'इन्द्रियत्व'मात्रोक्तौ चक्षुरादावति याप्तिः, अतः सुखादिसाक्षात्कारकारणत्वविशेषणम् । विशेष्यानुपादाने आत्मन्यतिव्याप्तिः, आत्मनः सुखादिकं प्रति समवायिकारणत्वात्, अत 'इन्द्रियत्व'रूपविशेष्योपादानम् ।

(प०) सुखेति । [1]आत्ममनःसंयोगादिवारणाय 'इन्द्रिय'मिति । चक्षुरादिवारणाय 'सुखे'ति ॥

टी०—जिस इन्द्रिय से सुख दुःख की उपलब्धि होती हैं उसे मन कहते हैं । प्रत्येक जीवात्मा के साथ भिन्न २ मन है इस लिये वह अनन्त है । मन परमाणु और नित्य है ।

रूपस्य किं लक्षणम् ? के च भेदाः ?—

चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात्सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र-पृथिव्यां सप्तविधम् । [2]अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ॥

(न्या०) रूपं लक्षयति—चक्षुरिति । चक्षुमात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्षणम् । विशेष्यमात्रोपादाने रसादावतिव्याप्तिः ।

१ अत्रादिपदेन कालादिसाधारणकारणानां संग्रहः । कार्यमात्रे साधारणकारणानि तु—
'ईशस्तज्ज्ञानयत्नेच्छाः कालोऽदृष्टं दिगेव च ।
प्रागभावप्रतिबन्धकाऽभावौ कार्ये साधारणाः स्मृताः ॥' इति ।

२ न चात्र 'गुणे शुक्लादयः पुंसि' इत्यनुशासनविरोधः शंक्यः । तस्य विशेष्यासमभिव्याहारविषयकत्वादत्र च रूपमित्यस्यानुषङ्गात् ।

प्रश्नः १—रूपस्य किं लक्षणम् , तच्च कतिविधम् , कुत्र च कीदृशम् ?—(१९००,१९०१,१९०४,१९१२,१९१५,१९१७,१९२०,१९२१,१९३६)

प्रश्नः २—रूपस्य लक्षणं सपदकृत्यमुक्त्वा तत्कति विधम्,कुत्र च कीदृशमिति सोदाहरणं लेख्यम् । कानि च रूपवन्ति द्रव्याणि ? (१९२२,१९२५,१९३३)

अतश्चक्षुर्मात्रग्राह्यत्वविशेषणम् । तावन्मात्रोपादाने रूपत्वेऽतिव्याप्तिः,—'यो [1]गुणो यदिन्द्रियग्राह्यस्तन्निष्ठा जातिस्तदिन्द्रियग्राह्ये'ति नियमात्, तद्वारणाय विशेष्योपादानम् । चक्षुर्मात्रग्राह्यत्वं नाम-चक्षुर्भिन्नेन्द्रियाऽग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम् । 'मात्र'पदानुपादाने संख्यादिसामान्यगुणेऽतिव्याप्तिः, तत्रापि चक्षुर्ग्राह्यत्वविशिष्टगुणत्वस्य सत्वात्, अतस्तद्वारणाय'मात्र'पदम् । संख्यादेश्चक्षुर्भिन्नत्वगिन्द्रियग्राह्यत्वाच्चक्षुर्मात्रग्राह्यत्वं नास्ति । अतीन्द्रियगुरुत्वादावतिव्याप्तिवारणाय-'चक्षुर्ग्राह्ये'-ति । अत्र लक्षणे ग्राह्यत्वं नाम—प्रत्यक्षविषयत्वम् । अग्राह्यत्वं नाम-तदविषयत्वम् । तथा च—'चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाऽविषयत्वे सति चक्षुर्जन्यप्रत्यक्षविषयत्व'मिति [2]फलितोऽर्थः । ननु प्रभा-घट-संयोगे रूपलक्षणस्याऽतिव्याप्तिस्तस्य चक्षुर्मात्रग्राह्यगुणत्वादिति चेन्न, गुणपदस्य विशेषगुणपरत्वात् । न चैवं विशेषगुणत्वघटित-लक्षणे संख्यादावतिव्याप्त्यभावान्मात्रपदवैयर्थ्यमिति वाच्यम्, जलमात्रवृत्तिसांसिद्धिकद्रवत्वादावतिव्याप्तिवारणाय तदुपादानात् । [3]अथवा चक्षुर्मात्रग्राह्यजातिमद्गुणत्वस्य लक्षणत्वान्न प्रभाघटसंयोगादावतिव्याप्तिः, संयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वाभावात् । घट-पटसंयोगस्य त्वगिन्द्रियग्राह्यत्वात्तद्गतजातेरपि त्वगिन्द्रियग्राह्यत्वात् । यो गुणो यदिन्द्रियग्राह्यस्तन्निष्ठजातेरपि[4] तदिन्द्रियग्राह्यत्वात् । अत्र[5] जातिघटितलक्षणे गुणत्वानुपादाने चक्षुर्मात्रग्राह्यजातिमति सुवर्णादावतिव्याप्तिरतस्तद्वारणाय तदुपादानम् । एवं रसादिलक्षणे विशेषणानुपादाने लक्ष्यभिन्नगुणादावतिव्याप्तिः । विशेष्यानुपादाने लक्ष्यमात्रवृत्ति-

१ येनेन्द्रियेण या व्यक्तिर्गृह्यते तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यत इति नियमस्य प्रकृतोपयोग्यंशमात्रोपादानमिदम् ।

२ फलित इति । चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्य-प्रत्यक्षविषयत्वे च सति गुणत्वं रूपत्वमित्येवंविधः फलिताऽर्थो बोध्यः ।

३ अतीन्द्रिये परमाण्वादिरूपेऽव्याप्तिवारणायाऽऽह—अथ वेत्यादि ।

४ अत्रत्येनापिशब्देन तदभावस्य ग्रहणम् ।

५ अत्रादिपदेन स्वर्णादेः परिग्रहः ।

रसत्व-गन्धत्वादावतिव्याप्तिः । अतो विशेषणविशेष्ययोरुपादानम् ॥

(प०) चक्षुरिति । रूपत्वादिवारणाय 'गुण'पदम् । रसादिवारणाय 'चक्षुर्ग्राह्य' इति । संख्यादिवारणाय 'मात्र'पदम् । यद्यपि प्रभाभित्तिसंयोगवारणाय गुणपदेन विशेषगुणस्य विवक्षणीयतया तत एव संख्यादिवारणं संभवतीति मात्रपदं व्यर्थं, तथापि सांसिद्धिकद्रवत्ववारणाय तदावश्यकम् । वस्तुतस्तु परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वस्य विवक्षणीयतया 'विशेष'पदं न देयम् । द्व्यणुकादिवारणाय 'गुण'पदं तु देयम् । सप्तेति । 'रूप'मित्यनुषज्यते ॥

टी०—जिस गुण का केवल नेत्र से प्रत्यक्ष होता है वह रूप है । वह शुक्ल, नील, पीत, रक्त, हरित, कपिश, चित्र इन भेदों से सात तरह का है । पृथिवी, जल और तेज में वह रूप रहता है । पृथिवी में सात प्रकार का रूप है । जल में बिना चमक वाला सफेद रूप है । तेज में चमकीला और प्रकाशक रूप है ।

रसस्य लक्षणं तद्भेदश्चेति—

रसनग्राह्यो[1] गुणो रसः । स च मधुराऽम्ल-लवण-कटु-कषाय-तिक्तभेदात्—षड्विधः । पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ॥

(प०) रसनेति । [2]रसत्वादिवारणाय 'गुण' इति । रूपादावतिव्याप्तिवारणाय 'रसने'ति । तत्रेति । पृथिवी-जलयोरित्यर्थः । षड्विध इति । अत्र 'रस' इत्यनुवर्तते ॥

टी०—जीभ से जिस गुण का प्रत्यक्ष होता है उसे रस कहते हैं । वह मधुर, अम्ल,

---

१ रसनभिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति रसनेन्द्रियजन्यप्रत्यक्षविषयत्वे च सति गुणत्वं रसस्य लक्षणम् ।

२ रसत्वेऽतिव्याप्तिवारणायेत्यस्य रसनाग्राह्यगुणविभाजकोपाधिमत्त्वेऽतिव्याप्तिवारणायेत्यर्थः ।

प्रश्नः—रसः कतिविधः ? कुत्र च कीदृशः ? किं च तल्लक्षणम् ? (१९०६ १९१२)

लवण, कटु, कषाय, तिक्त के भेद से छ प्रकार का होता है। वह रस पृथिवी और जल में रहता है। पृथिवी में छहो प्रकार का रस है। जल में केवल मधुर रस है।

गन्धस्य लक्षणं तद्भेदश्च—

घ्राणग्राह्यो[1] गुणो गन्धः। स द्विविधः सुरभिर[2]-सुरभिश्च। पृथ्वीमात्रवृत्तिः॥

(प०) घ्राणग्राह्य इति। गन्धत्वादावतिव्याप्तिवारणाय 'गुण' इति। रूपादावतिव्याप्तिवारणाय 'घ्राणग्राह्य' इति। पृथिवीति। 'पृथिवीसंबन्धसत्त्वे गन्धप्रतीतिसत्त्वं' 'पृथिवीसम्बन्धाभावे गन्धप्रतीत्यभावः'-इत्यन्वय-व्यतिरेकाभ्यां पृथिवीगन्धस्यैव जले प्रतीतिर्बोध्या। एवं वायावपि। ननु-देशान्तरस्थकस्तूरीकुसुमसम्बद्धपवनस्यैतद्देशे तत्सम्बन्धाभावाद्गन्धप्रतीत्यनुपपत्तिः। न च वाय्वानीतत्र्यणुकादिसंबन्धोऽस्त्येवेति वाच्यम्, कस्तूर्यां न्यूनतापत्तेः, कुसुमस्य च सच्छिद्रत्वापत्तेरिति चेन्न, भोक्त्रदृष्टविशेषेण पूर्ववत्-त्र्यणुकान्तराद्युत्पत्तेः कर्पूरादौ तु त[3]दभावान्न तथात्वमिति॥

टी०—घ्राणेन्द्रिय से जिस गुण का ज्ञान हो वह गन्ध कहलाता है। गन्ध दो प्रकार का है—सुगन्ध और दुर्गन्ध गन्ध केवल पृथ्वी में रहता है।

स्पर्शस्य किं लक्षणम्? के च भेदाः?—

त्वगिन्द्रियमात्रग्राह्यो[4] गुणः स्पर्शः। स च त्रिविधः।

---

१ घ्राणभिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति घ्राणेन्द्रियजन्यप्रत्यक्षविषयत्वे च सति गुणत्वं गन्धस्य लक्षणम्।

२ गन्धे सुरभित्वं नाम षट्पदाद्यभिलाषविषयत्वमेव।

३ दृष्टानुसारेणैवाऽदृष्टकल्पनम्भवतीति भावः। वस्तुतस्तु-उद्बुद्धानुद्बुद्धभेदाभ्यां गन्धस्य द्वैविध्यात्तत्र कुसुमादावुभयविधगन्धवत्वम्। अत एव यन्त्रद्वारा सारनिस्सृतनिश्शेषकुसुमे गन्धाभावस्याप्युपलब्धिः। तथा च रजतापहारिसलिलसम्पर्काद्रजतपर्णोपरिभागस्थसूक्ष्मावयवाऽपहरणवद्वेगशालिवायुनाऽपि कुसुमोपरिभागस्थसूक्ष्मावयवापकर्षान्न सच्छिद्रत्वादिदोषापत्तिर्नाप्यदृष्टादिक्लिष्टकल्पनेति भावः।

४ त्वगितरेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वे च

शीतोष्णाऽनुष्णाऽशीत-भेदात् । पृथिव्यप्तेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाऽशीतः पृथिवी-वाय्वोः ॥

(न्या०) स्पर्शं [1]लक्षयति-त्वगिन्द्रियमात्रग्राह्य इति । अत्रापि-'मात्र' पदं संख्यादिसामान्यगुणादावतिव्याप्तिवारणाय । अन्य-विशेषणकृत्यं पूर्ववद्बोध्यम् । 'ग्राह्यत्व'पदार्थोऽपि पूर्ववदेव प्रत्यक्ष-विषयत्वरूप एव बोध्यः ॥

(प०) स्पर्शत्वादावतिव्याप्तिवारणाय 'गुण' इति । रूपादा-वतिव्याप्तिवारणाय 'त्वगिन्द्रिये'ति । संख्यादिवारणाय 'मात्र'पदम् । तत्रेति । पृथिव्यादिचतुष्टये । शीत इति । शीतस्पर्शः । उष्ण इति । उष्णस्पर्शः ॥

टी०—केवल त्वगिन्द्रिय से जिस गुण का प्रत्यक्ष होता है वह स्पर्श है । स्पर्श तीन प्रकार का है—शीत (ठंढा), उष्ण (गर्म) और अनुष्णाशीत (कुनकुना) । पृथिवी जल, तेज और वायु में स्पर्श रहता है । इनमें शीत स्पर्श जल में, उष्ण स्पर्श तेज में, पृथिवी और वायु में अनुष्णाशीत स्पर्श रहता है ।

रूप-रस-गन्ध-स्पर्शाः कुत्र पाकजाः कुत्राऽपाकजा वेति ?—

रूपादिचतुष्टयं पृथिव्यां-पाक[2]जमनित्यं च । अ[3]न्यत्राऽपाकजं नित्यमनित्यं च । नित्य[4]गतं नित्यम् । अ[5]नित्यगतमनित्यम् ॥

सति गुणविभाजकोपाधिमत्वं स्पर्शस्य लक्षणम् ।

१ अत्रापि लक्षधातोरुक्त एवार्थो वेदितव्यः ।

२ अत्र पाकजमित्यस्य पाकस्तेजःसंयोगस्तेनपूर्वरूपं नश्यति, रूपान्तरमुत्पद्यत इत्यर्थः

३ अन्यत्र अबादित्रये । अपाकजं रूपरसस्पर्शत्रयमग्निसंयोगानुत्पन्नमित्यर्थः ।

४ नित्यगतमित्यस्य परमाणुगतमित्यर्थः ।

५ अनित्यगतमित्यस्य कार्यगतमित्यर्थः ।

प्रश्नः—किं नाम पाकजं रूपम् ? कुत्र तद्वर्तते ? (१९३७)

(न्या०) रूपादिचतुष्टयमिति। एतत्तत्त्वनिर्णयश्चेत्थम्—पाको नाम विजातीयतेजःसंयोगः। स च नानाजातीयरूपजनको विजातीयः—तेजःसंयोगः। तदपेक्षया रसजनको—विजातीयः। एवं गन्धजनकोऽपि ततो--विजातीय एव। एवं स्पर्शजनकोऽपि-तथैव। एवं प्रकारेण भिन्नभिन्नजातीयाः पाकाः कार्यवैलक्षण्येन कल्पनीयाः। यथा तृणपुञ्जनिक्षिप्ते आम्रादौ ऊष्मलक्षणावि-जातीयतेजःसंयोगात्पूर्वहरितरूपनाशेन रूपान्तरस्य पीतादेरुत्प-त्तिर्न तु रसादेरुत्पत्तिः। पूर्वरसस्याऽम्लस्यैवानुभवात्। क्वचित्पू-र्वहरितरूपसत्त्वेऽपि रसपरावृत्तिर्दृश्यते। विजातीयतेजःसंयोग-रूपपाकवशात्पूर्वतनाऽम्लरसनाशेन मधुररसस्यानुभवात्। तस्मा-द्रूपजनकापेक्षया रसजनको विलक्षण एवाङ्गीकार्यः। एवं गन्ध-जनको विलक्षण एव, रूप-रसयोरपरावृत्तावपि पूर्वगन्धनाशेऽपि विजातीयपाकवशात्सुरभिगन्धोपलब्धेः। एवं स्पर्शजनकः, पाकवशात्क-ठिनस्पर्शनाशेन मृदुस्पर्शानुभवात्। तस्माद्रूपादिजनका विजातीया एव पाकाः। अतएव पार्थिवपरमाणूनामेकजातीयत्वेऽपि पाकमहिम्ना विजा-तीयद्रव्यान्तरानुभवः। यथा गोभुक्ततृणादीनामापरमाण्वन्तभङ्गे तृणा-रम्भकपरमाणुषु विजातीयतेजःसंयोगात्पूर्वरूपादिचतुष्टयनाशे तदन-न्तरं दुग्धे यादृशं रूपादिकं वर्तते तादृशरूपरसगन्धस्पर्शजनकास्तेजः संयोगा जायन्ते। तदुत्तरं तादृशरूपरसादय उत्पद्यन्ते। तादृशरूप-रसादिविशिष्टपरमाणुभिर्दुग्धद्व्यणुकमारभ्यते। ततस्त्र्यणुकादिक्रमेण महादुग्धारम्भः। एवं दुग्धारम्भकैः परमाणुभिरेव दध्यारभ्यते। एवं पाकमहिम्ना दध्यारम्भकैरेव परमाणुभिर्नवनीतादिकमिति दिक्॥

टी० — रूप, रस, गन्ध, स्पर्श ये चार गुण पृथ्वी में पाकज (अर्थात् तेज के संयोग से उत्पन्न होने वाले) हैं और अनित्य हैं। अन्यत्र (अर्थात् जल, तेज, वायु में) ये (रूप आदि चारो गुण) अपाकज हैं। जल तेज वायु में रहने वाले रूप, रस, स्पर्श ये गुण नित्य और अनित्य दोनों हैं। नित्य (अर्थात् परमाणु) में रहने वाले रूप आदि नित्य और अनित्य (अर्थात् घटपटादि) में रहने वाले वे अनित्य हैं।

संख्यायाः किं लक्षणम्? कुत्र च सा तिष्ठतीति?—

[1]एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः-एकत्वादिपरार्धपर्यन्ता। [2]एकत्वं नित्यमनित्यं च। [3]नित्यगतं-नित्यम्। [4]अनित्यगतमानित्यम्। [5]द्वित्वादिकं तु [6]सर्वत्राऽनित्यमेव॥

(प०) एकत्वादीति। 'एकत्व'मित्यादिर्यो व्यवहारः-'एको द्वा'वित्याद्यात्मकस्तस्य हेतुः संख्या इत्यर्थः। घटादिवारणाय-'एकत्वादी'ति। कालादिवारणाय'असाधारणे'त्यपि देयम्। ननु संख्यायो अवधिरस्ति न वेत्यत आह-एकत्वादीति। तथा च—

"एकं दशं शतं चैव सहस्रमयुतं तथा।
लक्षं च नियुतं चैव कोटिरर्बुदमेव च॥
वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः।
अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रमम्॥"

—इति महदुक्तेः परार्धपर्यन्तैव संख्या इति भावः॥

टी०—एक दो आदि व्यवहार का कारण संख्या है। वह संख्या नव द्रव्य में रहती है और एक से लेकर परार्द्ध तक होती है। एकत्व संख्या नित्य और अनित्य

---

१ एको द्वावित्याद्यात्मको य एकत्वादिव्यवहारस्तस्याऽसाधारणहेतुत्वं संख्यात्वमिति लक्षणम्।

२ नित्यानित्यादिभेदाभ्यामेकत्वस्यापि द्वैविध्यादाह—नित्यमनित्यञ्चेति।

३ नित्यगतमित्यस्य परमाणुगतमित्यर्थः। एकत्वनाशम्प्रत्याश्रयनाशस्य हेतुत्वेन परमाणुनाशाऽभावेन तद्गतैकत्वस्यापि नाशाऽभाव इति भावः।

४ अनित्यगतं कार्यगतम्। द्व्यणुकादीनां नाशात्तद्गतैकत्वस्यापि नाश इति भावः।

५ अत्र समवायिकारणगतैकत्वस्याऽसमवायिकारणत्वम्। अयमेकोऽयमेक इत्यपेक्षाबुद्धेर्निमित्तकारणत्वम्। अपेक्षाबुद्धिनाशस्य च व्यासज्यवृत्तिद्वित्वादिविनाशकत्वमवधेयम्।

६ सर्वत्रेत्यस्य नित्याऽनित्यद्रव्ययोरित्यर्थः। एवञ्चापेक्षाबुद्धिजन्यत्वेन द्वित्वादेरनित्यत्वमेवेति बोध्यम्।

प्रश्नः-संख्यायाः, परिमाणस्य च, लक्षणं विभागश्च सविस्तरमुपपाद्यताम् (१९३?)

दोनों तरह की होती है। परमाणु, आकाश आदि, नित्य पदार्थों में रहने वाला एकत्व नित्य है। और घट पट आदि अनित्य पदार्थों में रहने वाला एकत्व अनित्य है। परन्तु द्वित्वादि संख्या तो अनित्य ही है।

परिमाणस्य किं लक्षणम्? के च भेदाः?—

मानव्यवहाराऽसाधारणं कारणं[1] परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्-अणु, महद्दीर्घं, ह्रस्वं चेति॥

(प०)मानेति। मानं=परिमितिस्तस्या यो व्यवहारः='इदं महत्' 'इदमणु'-इत्याद्यात्मकः, तस्य कारणं परिमाणमित्यर्थः। दण्डादिवारणाय-'माने'ति। कालादिवारणाय-'असाधारणे'ति। शब्दत्ववारणाय-'कारणमि'ति। नवद्रव्येति। चतुर्विधमपि परममध्यभेदेन द्विविधम्। तत्र परमाणुह्रस्वत्वे-परमाणुमनसोः, मध्यमाणुह्रस्वत्वे-द्व्यणुके, परममहत्वदीर्घत्वे-गगनादौ, मध्यममहत्त्वदीर्घत्वे घटादौ। 'एतन्मौक्तिकादिदं मौक्तिकमणु' इतिव्यवहारस्यापकृष्टमहत्त्वाश्रयत्वाद्, गौणत्वं बोध्यम्। एवमेव 'केतनाद्व्यजनं ह्रस्व'मित्यत्रापि निकृष्टदीर्घत्वाद्गौणत्वम्।

टी०—नापने-तौलने के व्यवहार का जो मुख्य कारण है उसे परिमाण कहते हैं। यह नव द्रव्यों में रहता है। परिमाण चार तरह का है—अणुत्व, महत्व, दीर्घत्व और ह्रस्वत्व।

पृथक्त्वस्य किं लक्षणम्?—

पृथग्[2]व्यवहाराऽसाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति॥

---

१ अत्र कारणपदानुपादाने मानव्यवहारासाधारणत्वमात्रलक्षणाङ्गीकारे मानव्यवहारेति शब्देऽपि शब्दत्वधर्मस्याप्यसाधारणत्वेन तत्र परिमाणत्वस्यातिप्रसक्त्या कारणपदोपादानम्।

२ एकपृथक्त्व-द्विपृथक्त्वादिभेदैः पृथक्त्वस्यानेकविधत्वम्। तत्रैकपृथक्त्वं नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्विपृथक्त्वादिकं सर्वत्राऽनित्यमेव। अस्य

प्रश्नः १—परिमाणस्य लक्षणं तत्रत्यपदानां कृत्यं तद्भेदांश्च ब्रूत।
(१६१० १६१८, १६२१)

[प०] **पृथगिति**। 'अयमस्मात्पृथगि'ति यो व्यवहारस्तस्य कारणं पृथक्त्वमित्यर्थः। दण्डादिवारणाय'पृथगि'त्यादि। कालादिवारणाय'असाधारणे'ति। पृथग्व्यवहारत्ववारणाय 'कारण'मिति॥

टी०—यह इससे भिन्न है—इस व्यवहारका मुख्य कारण पृथक्त्व है। यह नव द्रव्यों में रहता है।

संयोगस्य लक्षणम्—

संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः॥

(प०) **संयुक्तेति**। 'इमौ संयुक्ता'विति यो व्यवहारस्तस्य हेतुः संयोग इत्यर्थः। दण्डादिवारणाय'संयुक्तव्यवहारे'ति। कालादिवारणाय-'असाधारणे'त्यपि देयम। संयुक्तव्यवहारत्वेऽतिप्रसक्तिवारणाय 'हेतु'रिति। उपदर्शितलक्षणचतुष्टयेऽसाधारणपदं देयम्। क्वचित्पुस्तके परिमाणपृथक्त्वलक्षणे 'ईश्वरेच्छादिवारणाय' 'असाधारणे'ति दृश्यते, तत्तु-आधुनिकैर्न्यस्तमिति बोध्यम्॥

टी०—'ये दो पदार्थ मिले हुए हैं'—इस व्यवहारका असाधारण हेतु संयोग है। संयोग भी ९ द्रव्यों में रहता है।

विभागस्य लक्षणम्—

संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः॥

चाश्रयद्वितीयक्षणे प्रादुर्भावः। आश्रयनाशान्नाशश्च। अयमत्र विचारः-भेदातिरिक्तं पृथक्त्वमस्ति न वा, अस्ति चेत्तत्र किम्मानमिति जिज्ञासायाम्-घटः पटो नेति विलक्षणप्रतीतेः घटः पटात्पृथगिति प्रतीतिरेव मानमित्युत्तरम्।

१ इमौ संयुक्ताविति व्यवहारस्याऽसाधारणहेतुत्वं संयोगस्य लक्षणम्। अयं च संयोगः अन्यतरकर्मज—उभयकर्मज—संयोगजभेदैस्त्रिविधः। तत्र-पक्षि-गिरिसंयोगः प्रथमः। मेषद्वयसंयोगो द्वितीयः। कपाल-तन्तुसंयोगात्तन्तु-कुम्भसंयोगस्तृतीयः, अभिघा-तनोदनभेदाभ्यां कर्मजसंयोगस्यापि द्वैविध्यम्। तत्र शब्दहेतुराद्यः। शब्दाऽहेतुर्द्वितीयः।

२ संयोगनाशकत्वे सति गुणत्वम्—विभक्तव्यवहाराऽसाधारणकारणत्वे सति गुणत्वं वा विभागस्य लक्षणम्। ननु विभागस्याद्यलक्षणे संयोगनाशकेत्युक्तावपि संयोगेऽतिव्याप्तिः स्यात् संयोगस्य प्रतियोगिविधया नाशम्प्रति हेतुत्वादिति चेन्न्।

(न्या०) विभागं लक्षयति—संयोगेति। संयोगनाशकत्वविशिष्ट-गुणत्वं विभागस्य लक्षणम्। विशेषणमात्रोपादाने क्रियाया अपि संयोगनाशकत्वात्तत्राऽतिव्याप्तिस्तद्वारणाय 'गुणत्व'मिति विशेष्योपादानम्॥

[प०]संयोगेति। संयोगनाशजनक इत्यर्थः। कालेऽतिप्रसक्तिवारणाय'गुण'पदम्। ईश्वरेच्छादिवारणाय'असाधारणे'त्यपि बोध्यम्। ननु असाधारणपदोपादाने गुणपदस्य वैयर्थ्यं स्यादिति चेन्न। क्रियायामतिप्रसक्तिवारणाय तस्याप्यावश्यकत्वात्।

टी०—संयोग का नाश करने वाला गुण विभाग कहलाता है। यह भी नौ द्रव्यों में रहता है।

परत्वाऽपरत्वयोर्लक्षणं भेदश्चेति—

पराऽपरव्यवहाराऽसाधारणकारणे-परत्वाऽपरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी।[1] ते च द्विविधे। दिक्कृते, कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्॥

[प०] परेति। परव्यवहारासाधारणं कारणं परत्वम्। अपरव्यवहारासाधारणं कारणमपरत्वमित्यर्थः। [2]दण्डादिवारणाय'पर-

---

प्रतियोगितासम्बन्धानवच्छिन्ननाशविशिष्टजन्यतानिरूपितजनकत्वविवक्षणेनादोषादिति-केचित्। वस्तुतस्तु संयोगनाशत्वावच्छिन्ननिरूपितसमवायावच्छिन्नकारणत्वमित्येव निष्कृष्टलक्षणम्बोध्यम्।

१ परत्वापरत्वयोः प्रत्येकं द्वैविध्यमाह—दिक्कृत इत्यादिना।

२ परत्वलक्षणे परव्यवहारेत्यस्यानुपादाने असाधारणकारणत्वमात्रस्यैव लक्षणत्वे दण्डेऽपि दण्ड इत्यभिधानात्मकाऽसाधारणकारणत्वस्य सत्त्वात्तत्रातिव्याप्तिः स्यात्तन्निरासाय तदुपादानम्।

प्रश्नः १—परत्वाऽपरत्वयोर्लक्षणं विभागं च प्रदर्श्य कुत्र कीदृशं वर्तते तत्प्रदर्शय। (१९२३, १९२६, १९३३)

प्रश्नः २—परत्वाऽपरत्व-द्रवत्व-शब्द संस्काराणां कानि लक्षणानि (१९३५)

व्यवहारे'ति । [1]'कालादिवारणाय-'असाधारणे'ति । परव्यवहारत्व-वारणाय 'कारणे'ति । एवमेव द्वितीयेऽपि बोध्यम् ॥

टी०—पर और अपर व्यवहार के असाधारण कारण परत्व और अपरत्व हैं । ये (परत्व-अपरत्व) पृथ्वी, जल, तेज, वायु और मन में रहते हैं । ये दो प्रकार के हैं—दिक्कृत और कालकृत । दूरस्थ पदार्थ में दिक्कृत परत्व और समीपस्थ वस्तु में दिक्कृत अपरत्व है । ज्येष्ठ (बड़े) में कालकृत परत्व और कनिष्ठ में कालकृत अपरत्व है ।

गुरुत्वस्य किं लक्षणमिति प्रश्ने उत्तरम्—

आद्यपतनाऽसमवायिकारणं गुरुत्वं, पृथिवीजलवृत्ति ॥

[न्या०] गुरुत्वं लक्षयति—आद्येति । द्वितीयपतनक्रियायां वेगस्यासमवायिकारणत्वात्तत्रातिव्याप्तिवारणाय 'आद्ये'ति । उत्तरत्र स्यन्दने 'आद्य'विशेषणमपि पूर्ववदेव योजनीयम् ॥

[प०] आद्येति । [3]दण्डादिवारणाय'असमवायी'ति । रूपा-दिवारणाय '[4]पतने'ति । वेगेऽतिव्याप्तिवारणाय'आद्ये'ति ।

टी०—पहले गिरने का जो असमवायि कारण है उसे गुरुत्व कहते हैं । यह पृथ्वी और जल में रहता है ।

द्रवत्वस्य लक्षणं भेदस्तत्स्थानञ्च—

आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम् । पृथि-

---

१ लक्षणे साधारणपदानुपादाने परव्यवहारे परव्यवहारत्वस्याप्यसाधारणधर्मत्वेनातिव्याप्तिः स्यादतस्तदिति भावः ।

२ पतने आद्यत्वं नाम स्वसमानाधिकरणपतनप्रतियोगिकध्वंसासमानकालिकत्वम् । द्वितीयपतनादीनां प्राथमिकपतनध्वंससमानकालिकत्वान्निरास इति भावः ।

३ आम्रपतनादिरूपक्रियायां बहुशो दण्डलोष्टादीनां निमित्तकारणत्वात्तत्रातिव्याप्तिरित्यसमवायीत्युक्तिः ।

४ कपालादिगतरूपादेरपि घटादिगतरूपादेरप्यसमवायिकारणत्वेन तत्रातिव्याप्तिः स्यादतः पतनेतिपदोपादानम् ।

५ स्यन्दने आद्यत्वं च स्वसमानाधिकरणस्यन्दनप्रतियोगिकध्वंसासमानकालिक-

---

प्रश्नः १—द्रवत्वं निरूप्य तत्कतिविधं, कुत्र, कीदृशञ्चेत्युच्यताम् ।
(१९०३, १९०७, १९२२)

व्यप्तेजोवृत्ति। तद्द्विविधम्। सांसिद्धिकं, नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ॥

[प०] आद्यस्यन्दनेति। [4]दण्डादिवारणाय 'असमवायी'ति। [5]रसादिवारणाय 'स्यन्दने'ति॥

टी०—आद्यस्यन्दन (बहने, टपकने) का असमवायि कारण द्रवत्व है। यह पृथ्वी जल और तेज में रहता है। द्रवत्व दो प्रकार का होता है—सांसिद्धिक (स्वाभाविक) और नैमित्तिक (तेज के संयोग से होने वाला)। सांसिद्धिक द्रवत्व जल में और नैमित्तिक द्रवत्व पृथ्वी और तेज में रहता है। घृत और सुवर्ण आदि पदार्थों में नैमित्तिक द्रवत्व है क्योंकि अग्नि के संयोग से द्रवत्व होता है।

स्नेहस्य किं लक्षणं? तच्च कुत्र तिष्ठतीति?—

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः॥

[न्या०] स्नेहं लक्षयति—चूर्णादीति। चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम्। पिण्डीभावो नाम-चूर्णादेर्धारणाकर्षणहेतुभूतो विलक्षणः संयोगः। तादृशसंयोगे स्नेहस्यैवाऽसाधारणकारणत्वं न तु जलादिगतद्रवत्वस्य। तथा सति द्रुतसुवर्णादिसंयोगेन चूर्णादेः पिण्डीभावापत्तेः। अतः स्नेह एवा[6]साधारणं कारणम्। विशेषणमात्रोपादाने—कालादावति-

---

त्वम्। द्वितीयस्यन्दनादीनां प्राथमिकस्यन्दनध्वंससमानकालिकत्वात्तन्निरासः, स्यन्दनं स्रवणरूपक्रियाविशेषस्तदसमवायिकारणमित्यर्थः।

१ सांसिद्धिकत्वञ्च निमित्तानपेक्षाऽधोदेशप्रसरत्वम्।

२ अत्रत्यमादिपदं लाक्षाग्राहकम्।

३ अत्रादिपदेन पूर्वोक्तलोहपदवाच्यग्रहणम्।

४ कुत्रचित्प्रतिरुद्धसलिलस्थले दण्डस्यापि स्यन्दने निमित्तकारणत्वात्तत्रातिव्याप्तिरतोऽसमवायिपदोपादानम्।

५ अवयवगतरसत्वाद्यवच्छिन्नस्याऽवयविगतरसत्वाद्यवच्छिन्नम्प्रति हेतुत्वेन प्रसक्तातिव्याप्तिवारणाय स्यन्दनपदोपादानम्।

६ असाधारणमित्यस्य निमित्तकारणमित्यर्थः।

व्याप्तिरतस्तद्वारणाय विशेष्योपादानम् । [1]वस्तुतस्तु द्रुतजलसंयोगस्यैव पिण्डीभावहेतुत्वं, स्नेहस्य पिण्डीभावहेतुत्वे मानाभावात् । जले द्रुतत्वविशेषणात्करकादिव्यावृत्तिः ॥

(प०) चूर्णादीति । चूर्ण=पिष्टं तदेवादिर्यस्य-मृत्तिकादेः-स चूर्णादिः,तस्य । पिण्डीभावः=संयोगविशेषस्तस्य हेतुः=निमित्तकारणं-स्नेह इत्यर्थः । कालादावतिव्याप्तिवारणाय 'गुण'पदम् । रूपादावतिव्याप्तिवारणाय 'पिण्डीभावे'ति । 'चूर्ण'पदं [2]स्पष्टार्थम् ॥

टी०—चूर्ण आदि पिसी हुई चीजों को इकट्ठा करने वाला गुण स्नेह कहलाता है। यह स्नेह (चिकनाहट) केवल जल में रहता है।

शब्दस्य किं लक्षणम् ? के च तद्भेदाः ?—

[3]श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधः । ध्वन्यात्मको, वर्णात्मकश्च । तत्र ध्वन्यात्मको-भेर्यादौ[4] । वर्णात्मकः-संस्कृतभाषादिरूपः ॥

(न्या०) शब्दं लक्षयति—श्रोत्रेति । शब्दत्वेऽतिव्याप्तिवारणाय 'गुण' इति । रूपादावतिव्याप्तिवारणाय 'श्रोत्रे'ति । [5]स त्रिविधः—संयोगजो, विभागजः, शब्दजश्चेति । यथा—भेरीदण्ड-

१ वस्तुतस्त्विति ग्रन्थेन स्नेहस्य मूलोक्तलक्षणं व्याहतमतोऽगत्या स्नेहत्वजातिमत्त्वमेव स्नेहस्य लक्षणं वाच्यम् ।

२ लोहादिपिण्डीभावहेतुभूताग्निसंयोगेः व्यभिचारनिवृत्तये चूर्णपदस्यावश्यकत्वात्तस्य स्पष्टार्थत्वाऽभिधानं चिन्त्यमिति भावः ।

३ श्रोत्रेतरेन्द्रियाग्राह्यत्वे सति श्रोत्रेन्द्रियग्राह्यत्वे च सति गुणत्वं शब्दस्य लक्षणम् ।

४ अत्रत्यमादिपदं वेणुवीणादिसंग्राहकम् ।

५ ध्वन्यात्मक-वर्णात्मकभेदेन द्विविधस्यापि शब्दस्य संयोगज-विभागज-शब्दजभेदेन त्रैविध्यं भवति । तत्र ध्वन्यात्मकशब्दस्य टीकाकर्त्रैव त्रैविध्योपपादनान्नाभिहितम्मया किन्तु वर्णात्मकशब्दस्य त्रैविध्यमभिधीयते । तथाहि-वायुकण्ठसंयोगेन ओष्ठद्वयविभागेन वीचीतरंगन्यायेन च तस्य त्रैविध्यम्बोध्यम् । तत्राऽऽकाशस्य शब्दमात्रे समवायिकारणत्वम् । कण्ठाकाशसंयोगस्य ओष्ठाकाशविभागादेश्चाऽसमवायिकारणत्वम् ।

संयोगजो झांकारादिशब्दः, हस्ताभिघातसंयोगजन्यो मृदङ्गादिशब्दः। वंशे पाट्यमाने दलद्वयविभागजश्चटचटाशब्दः। शब्दोत्पत्तिदेशमारभ्य श्रोत्रदेशपर्यन्तं वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा निमित्तपवनेन शब्दधारा जायन्ते। तत्र उत्तरोत्तरशब्दे पूर्वपूर्वशब्दः कारणम् ॥

(प०) श्रोत्रेति। शब्दत्वेऽतिव्याप्तिवारणाय-'गुण' इति। रूपादिवारणाय 'श्रोत्रग्राह्य' इति। वस्तुतस्तु श्रोत्रोत्पन्नशब्दस्यैव श्रोत्रग्राह्यत्वेन तद्भिन्नेऽव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्त्वे तात्पर्याद्गुणपदमनुपादेयमेव ॥

टी०—जिस गुणका कर्णेन्द्रिय से प्रत्यक्ष होता है, वह शब्द है। शब्द केवल आकाश में रहता है। वह दो प्रकार का है—ध्वन्यात्मक और वर्णात्मक। भेरी (नगाड़ा) आदि बाजाओं से उत्पन्न शब्द ध्वन्यात्मक और कंठ से उत्पन्न संस्कृत भाषादि रूप शब्द वर्णात्मक होता है।

बुद्धेः किं लक्षणम् ? कतिधा च सा ?—

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विधा। स्मृतिरनुभवश्च ॥

(न्या०) बुद्धेर्लक्षणमाह—सर्वव्यवहारेति। व्यवहारः—शब्दप्रयोगः। ज्ञानं विना शब्दप्रयोगासम्भवाच्छब्दप्रयोगरूपव्यव-

१ सर्वव्यवहाराऽसाधारणहेतुत्वे सति गुणत्वं बुद्धित्वमिति बुद्धेर्लक्षणम्. लाघवेन लक्षणान्तरं दर्शयति—ज्ञानमिति। ज्ञानत्वजातिमत्त्वं बुद्धित्वमिति बुद्धेर्लक्षणम्। ज्ञानत्वं च जानामीत्यनुव्यवसायगम्यत्वम्। ज्ञानत्वस्य जानामीत्यनुव्यवसायगम्यत्वं तु प्रमाणसिद्धत्वसूचनाय। तथाहि घटं जानामीत्याद्यनुव्यवसायस्यानुगतधर्ममन्तराऽनुपपन्नत्वेन तस्याऽभ्युपगन्तव्यतया लाघवाज्जातित्वसिद्धिः, लाघवञ्च शरीरकृतमुपस्थितिकृतं सम्बन्धकृतमिति त्रिविधम्बोध्यम्, प्रकृते च शरीरकृतमेव लाघवम्।

२ केचित्तु बुद्धिर्ज्ञानमिति पर्यायोपादानं ज्ञानबुद्ध्युपलब्धिशब्दानामस्मिञ्छास्त्रसमानार्थकत्वं न सांख्यानामिव भिन्नार्थकत्वमिति ज्ञापयितुमिति वदन्ति।

प्रश्नः १—बुद्धेः किं लक्षणम् ? (१९१९)

हारहेतुत्वं ज्ञानस्य लक्षणम् । बुद्धिं विभजते—सा द्विविधेति ।

(प०) बुद्धिलक्षणमाह—सर्वेति । सर्वे ये व्यवहारा=आहार-विहारादयस्तेषां हेतुर्बुद्धिरित्यर्थः । दण्डादिवारणाय-'सर्वव्यवहारे'ति। कालादिवारणाय—'असाधारणे'त्यपि देयम् ।

टी॰—जो गुण सभी व्यवहार का कारण है उसे बुद्धि और ज्ञान कहते हैं। बुद्धि दो तरह की है—स्मरण और अनुभव ।

स्मृतेः किं लक्षणम् ?—

संस्कारमात्रजन्यं ज्ञानं स्मृतिः ॥

[न्या०] स्मृतिं लक्षयति—संस्कारेति । संस्कारजन्यत्वविशिष्ट-ज्ञानत्वं स्मृतेर्लक्षणम्[1] । विशेषणानुपादाने प्रत्यक्षानुभवेऽतिव्याप्तिस्तद्वारणाय विशेषणोपादानम् । संस्कारध्वंसेऽतिव्याप्तिवारणाय विशेष्योपादानम् । ध्वंसम्प्रति प्रतियोगिनः[2]कारणत्वात् संस्कारध्वंसेऽपि संस्कारजन्यत्वस्य सत्त्वात् । [3]प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रपदम्॥

(प०) संस्कारेति । संस्कारध्वंसेऽतिव्याप्तिवारणाय 'ज्ञान'-मिति । अनुभवेऽतिव्याप्तिवारणाय 'संस्कारजन्य'मिति । तथापि प्रत्यभिज्ञायामतिव्याप्तिवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयम् । क्वचित्तथैव पाठः । न चैवं[4] सत्यसम्भवः, [5]तस्य संस्कारजन्यत्वे

---

१ संस्कारमात्रजन्यत्वे सति ज्ञानत्वं स्मृतित्वमिति, स्मृतेर्लक्षणम् । स्मृतित्वञ्च स्मरामीत्यनुभवसिद्धो जातिविशेषः ।

२ अत्र प्रतियोगित्वसम्बन्धेन ध्वंसम्प्रति तादात्म्यसम्बन्धेन प्रतियोगिनः कारणत्वमिति कार्यकारणभावो बोध्यः ।

३ पुरोवर्तिनि पूर्वदृष्टस्याभेदावगाहिज्ञानं प्रत्यभिज्ञा । 'सोऽयं देवदत्तः' इति ज्ञानम् । इदं च संस्कारेन्द्रियसंनिकर्षाभ्यां जायते । तत्र तत्तांशे संस्कारः, इदन्तांशे इन्द्रियसंनिकर्षो हेतुः । अतस्तत्तेदन्तावगाहिज्ञानमित्यपि लक्षणं बोध्यम् ।

४ कार्यमात्रस्याऽदृष्टादिसाधारणकारणजन्यत्वात्कस्यापि पदार्थस्य संस्कारमात्रजन्यत्वं नास्तीति भावः ।

५ तस्येति । मात्रपदस्येत्यर्थः ।

प्रश्नः १—स्मृतेर्लक्षणं तत्रत्यपदानां कृत्यं चोच्यताम् (१९०६)

सतीन्द्रियार्थसन्निकर्षाजन्यार्थकत्वात् ।

टी०—जो ज्ञान संस्कार मात्र से उत्पन्न होता है, उसका नाम स्मरण है।

अनुभवस्य लक्षणं तद्भेदश्च—

तद्भिन्नं ज्ञानमनुभवः । स द्विविधो यथार्थोऽयथार्थश्च ॥

(न्या०) अनुभवं लक्षयति—तद्भिन्नमिति । तद्भिन्नत्वं नाम स्मृतिभिन्नत्वम् । स्मृतिभिन्नत्वविशिष्टज्ञानत्वमनुभवस्य लक्षणम् तत्र विशेषणानुपादाने स्मृतावतिव्याप्तिः, विशेष्यानुपादाने घटादावतिव्याप्तिरतस्तद्वारणाय विशेषण-विशेष्ययोरुभयोरुपादानम् । अनुभवं विभजते—स द्विविध इति ॥

[प०] तदिति । स्मृतित्वावच्छिन्नभिन्नमित्यर्थः । तेन यत्किंचित्स्मृतिभिन्नत्वस्य स्मृतौ सत्त्वेऽपि न क्षतिः । घटादावतिव्याप्तिवारणाय 'ज्ञान'मिति । स्मृतिवारणाय 'तद्भिन्न'मिति ।

टी०—उससे भिन्न ज्ञानको अनुभव कहते हैं । वह दो प्रकार का होता है । यथार्थ (वास्तविक) और अयथार्थ ।

यथार्थानुभवस्य (प्रमाया वा) लक्षणम्—

तद्वति तत्प्रकारकोऽनुभवो यथार्थः[1] । सैवं प्रमेत्युच्यते[2] ॥

(न्या०) यथार्थानुभवं लक्षयति—तद्वतीति । 'तद्वती'त्यत्र सप्तम्यर्थो [3]विशेष्यत्वम् । तच्छब्देन प्रकारीभूतो धर्मो धर्तव्यः । तथा च [4]तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं यथार्थानुभवस्य लक्षणम् । उदाहरणम्—रजते 'इदं रजतम्' इति ज्ञानम् । अत्र रजतत्ववद्विशे-

१ यथा घटत्ववति घटे घटत्वप्रकारकानुभवो यथार्थ इत्यर्थः ।
२ भाष्यादिप्राचीनग्रन्थेषु प्रमाभेदेन विभागोऽस्तीत्यत आह—सैव प्रमेति ।
३ अत्र विशेष्यत्वस्यं निरूपकत्वसंबन्धेन अनुभवेऽन्वय इति शेषः ।
४ तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सत्यनुभवत्वमित्यर्थः ।

प्रश्नः १—अनुभवस्य किं लक्षणम् ? (१९३७)
प्रश्नः २—यथार्थानुभवस्य लक्षणं तत्पदव्यावर्त्यनिरूपणपुरःसरं लिखित्वा तद्विभागः प्रदर्शनीयः (१९२४. १९२८)

ष्यकत्वे सति रजतत्वप्रकारकत्वस्य सत्त्वाल्लक्षणसमन्वयः । "[1]तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारता[2]शालित्व'मिति तु निष्कर्षः । [3]अन्यथा यथाश्रुते [4]रङ्ग-रजतयोः-'इमे रजत-रङ्गे' इत्याकारकसमूहालम्बनभ्रमेऽतिव्याप्तिः, तत्रापि रजतत्ववद्विशेष्यकत्व-रजतत्वप्रकारकत्वयोरङ्गत्ववद्विशेष्यकत्व-रङ्गत्वप्रकारकत्वयोः सत्त्वात् । [5]उक्तनिष्कर्षे तु नातिव्याप्तिः, रजतत्वप्रकारताया रजतत्ववद्विशेष्यतानिरूपितत्वाभावात्, एवं रङ्गत्वप्रकारताया रङ्गत्ववद्विशेष्यतानिरूपितत्वाभावात् । किंतु समूहालम्बनभ्रमस्य रङ्गांशे रजतत्वावगाहित्वेन रजतत्वप्रकारताया रङ्गत्ववद्विशेष्यतानिरूपितत्वात् । एवं रजतांशे-रङ्गत्वावगाहित्वेन रङ्गत्वप्रकारताया रजतत्ववद्विशेष्यतानिरूपितत्वाच्चेति । नानामुख्यविशेष्यताशालिज्ञानं समूहालम्बनम् ॥

(५०) **तद्वतीति** । तद्वति तत्प्रकारो यस्य स तथेत्यर्थः । तद्वद्विशेष्यकतत्प्रकारक इति यावत् । स्मृतिवारणाय-'अनुभव'इति । अयथार्थानुभववारणाय 'तद्वती'ति । निर्विकल्पकेऽतिव्याप्तिवारणाय 'तत्प्रकारक' इति ॥

टी०—जो चीज वास्तव में जैसी हो उसको वैसी ही समझना यथार्थ अनुभव है । उसी का नाम प्रमा भी है ।

अयथार्थानुभवस्य लक्षणम्—

तद[6]भाववति तत्प्रकारकोऽनुभवोऽयथार्थः ॥

---

१ अत्र प्रकारतानिरूपित-प्रकारताशालिज्ञानत्वमिति फलितोऽर्थः ।

२ शालित्वमत्र निरूपकत्वम् ।

३ अन्यथा लक्षणघटकविशेष्यत्व-प्रकारत्वयोर्निरूप्य-निरूपकभावस्याविवक्षायाम् ।

४ विशेष्यत्वस्य साक्षादनुभवविशेषणत्वे ।

५ सप्तम्यर्थविशेष्यत्वस्य प्रकारताद्वारानुभवविशेषणत्वरूपनिष्कर्षे ।

६ अत्रैवासत्ख्यातिरिति शून्यवादी । आत्मख्यातिरिति क्षणिकविज्ञानवादी ।

प्रश्नः १—अयथार्थानुभवः कतिविधः ? (१९२६. १९३४)

प्रश्नः २—अयथार्थानुभवः कीदृशः, कतिविधश्च ?(१९३७)

(न्या०) अयथार्थानुभवं लक्षयति—तदभाववतीति। अत्रापि पूर्ववत्—तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठ[1]प्रकारताशालिज्ञानत्वं विवक्षणीयम्। अन्यथा रङ्ग-रजतयोः-'इमे रङ्ग-रजते'इत्याकार[2]समूहालम्बनप्रमायामतिव्याप्तिः। एतत्समूहालम्बनस्य रङ्गरजतोभयविशेष्यकत्वेन रजतत्व-रङ्गत्वोभयप्रकारकत्वेन च रजतत्वाभाववद्रङ्गविशेष्यकत्व-रजतत्वप्रकारकत्वयोः, रङ्गत्वाभाववद्रजतविशेष्यकत्व-रङ्गत्वप्रकारकत्वयोश्च सत्त्वात्। निष्कर्षे तु रजतांशे रजतत्वावगाहित्वेन रङ्गांशे रङ्गत्वावगाहित्वेन च रजतत्वप्रकारताया रजतत्वा भाववद्रङ्गविशेष्यतानिरूपितत्वाभावात्। एवं रङ्गत्वप्रकारताया रङ्गत्वाभाववद्रजतविशेष्यतानिरूपितत्वाभावान्नातिव्याप्तिः। उदाहरणम्—यथा शुक्तौ 'इदं रजतम्' इति॥

(प०) तदभावेति। तदभाववद्विशेष्यकतत्प्रकारकोऽनुभवोऽयथार्थानुभव इत्यर्थः। यथा शुक्तौ 'इदं रजतम्' इति ज्ञानम्। स्मृतिवारणाय 'अनुभव' इति। यथार्थानुभवेऽतिव्याप्तिनिरसनाय तदभाववती'ति। नि[3]र्विकल्पकवारणाय 'तत्प्रकारक' इति॥

टी०—जो चीज जैसी न हो और उसको वैसी समझना 'अथार्थ अनुभव' है।

यथार्थानुभवस्य भेदाः—

यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमिति-

अख्यातिरिति सांख्य-प्रभाकरौ। अनिवर्चनीयाख्यातिरिति वेदान्ती। अन्यथा ख्यातिरिति नैयायिक-वैशेषिकौ। इति तु संज्ञाप्रदर्शनमात्रमेतेषां खण्डन-मण्डनप्रकारश्च ग्रन्थान्तरेषु स्पष्टः।

१ अत्रापि प्रकारतानिरूपितप्रकारताशालिज्ञानत्वमित्यर्थो बोध्यः।

२ प्रमायां समूहालम्बनत्वञ्च विशेष्यताद्वयावगाहित्वरूपम्बोध्यम्।

३ निर्विकल्पकत्वञ्च प्रकारताद्यनवगाहित्वरूपम्।

प्रश्नः १—यथार्थानुभवः कतिविधः? (१९१८)

प्रश्नः २—यथार्थानुभवः कतिविधः, किंच तत्र याथार्थ्यम्? (१९१६,१९३४)

शाब्दभेदात् ॥

(न्या०) यथार्थानुभवं विभजते—चतुर्विध इति ॥

(प०) यथार्थेति । यथार्थानुभवः प्रत्यक्षमेवेति चार्वाकाः। अनुमितिरपीति काणाद-बौद्धाः । उपमितिरपीति नैयायिकैकदेशिनः। शाब्दमपीति नैयायिकाः । अर्थापत्तिरपीति प्राभाकराः । आनुपलब्धिकोऽपीति भाट्ट-वेदान्तिनौ । सांभविकैतिह्यकावपीति पौराणिकाः । चैष्टिकोऽपीति तांत्रिकाः । एतेषां मतेऽस्व[1]रसं संभाव्य तस्य चातुर्विध्यं दर्शितम् ।

टी०—यथार्थ अनुभव चार तरह का होता है—प्रत्यक्ष, अनुमिति, उपमिति और शाब्दबोध ।

चतुर्णामनुभवानां करणानि—

तत्करणमपि चतुर्विधम् । प्रत्यक्षानुमानोपमान-शब्दभेदात् ॥

---

१ अत्राऽस्वरसबीजन्तु—अर्थापत्त्यादिप्रमाणानां पूर्वोक्तप्रत्यक्षादिप्रमाणेष्वेवान्तर्भावसम्भवे पृथक्कल्पनं व्यर्थमित्येव । तथाहि—उपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। उपपाद्यज्ञानं करणम् । उपपादकज्ञानञ्च फलम् । रात्रिभोजनमन्तरेण दिवाऽभुञ्जानस्य पीनत्वानुपपत्या पीनत्वमुपपाद्यम् । रात्रिभोजनञ्चोपपादकम् । अर्थस्यापत्तिः कल्पनाऽर्थापत्तिः । अथवा अर्थस्यापत्तिः कल्पना यस्मादित्यर्थापत्तिशब्दः समासभेदेन फलकरणयोर्वाचक इति बोध्यम् । तथा च 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति दृष्टे श्रुते वा दिवाऽभुञ्जानस्य पीनत्वं रात्रिभोजनं विनानुपपन्नमित्यनुपपत्तिज्ञानं भवति, इयमेवार्थापत्तिः । ततो देवदत्तो रात्रिभोजी दिवाभुञ्जमानत्वे सति पीनत्वादिति केवलव्यतिरेक्यनुमानेनैव सिद्धो तस्या अकिञ्चित्करत्वादिति ॥१॥ एवमभावप्रत्यक्षेऽप्यनुपलब्धिसहकृतेनेन्द्रियस्यैव कारणत्वेनानुपलब्धेः पृथक्प्रमाणत्वमकिञ्चित्करमिति ॥ २ ॥ एवं शते पञ्चाशदिति निर्णयात्मकसम्भवोऽनुमानान्तर्भूतः ॥३॥ एवमिह वटे यक्षस्तिष्ठतीत्यैतिह्यमप्यज्ञातमूलवक्तृकः शब्द एव ॥४॥ एवञ्चेष्टाप्यनुमानप्रयोजिकैवेति सिद्धं प्रमाणानां चतुर्विधत्वमिति भावः ।

२ प्रसङ्गसङ्गत्या प्रमाणं विभजते—तत्करणमपीति ।

३ प्रत्यक्षेत्यादि । अक्षमक्षं प्रति जातं प्रत्यक्षम् । इत्येत्र प्रत्यक्षपदमिन्द्रियपरं

(न्या०) तत्करणमिति। फलीभूतप्रत्यक्षादिकरणं चतुर्विधमित्यर्थः। प्रत्यक्षादिचतुर्विधप्रमाणानां प्रमाकरणत्वं सामान्यलक्षणम्। एकैकप्रमाणलक्षणं तु वक्ष्यते-प्रत्यक्षज्ञानेत्यादिना।

(प०) तदिति। यथार्थानुभवात्मकप्रमायाः करणमित्यर्थः॥

टी०—उनके करण (असाधारण कारण) भी चार तरह के होते हैं—प्रत्यक्ष, अनुमान, उपमान और शब्द।

करणस्य किं लक्षणम्—

[1]असाधारणं कारणं करणम्॥

(न्या०) करणलक्षणमाह—असाधारणमिति। व्यापारवदसाधारणं कारणं करणमित्यर्थः। असाधारणत्वं च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यता निरूपितकारणताशालित्वम्। यथा दण्डादेर्घटादिकं प्रत्यसाधारणकारणत्वम्। कार्यत्वातिरिक्तो घटत्वादिरूपो धर्मः, तदवच्छिन्नकार्यता घटे, तन्निरूपितकारणता दण्डे। अतो घटं प्रति दण्डः-असाधारणं कारणम्। भ्रम्यादिरूपव्यापारवत्त्वाच्च करणम्। साधारणकारणत्वं च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वम्। ईश्वराऽदृष्टादेः कार्यत्वावच्छिन्नं प्रत्येव कारणत्वात्साधारणकारणत्वम्॥

(प०) असाधारणमिति। कालादिवारणाय-'असाधारण'-मिति व्यापारेऽतिव्याप्तिवारणाय-'व्यापारवदि'त्यपि देयम्। व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः। ईश्वरे-

तदेव विषयपरं ज्ञानपरञ्च गौण्या वृत्या बोध्यम्। एवमनुमीयते लिङ्गद्वारा ज्ञाप्यतेऽनेनेत्यनुमानं लिङ्गपरामर्शः। एवमुपमीयते सादृश्येन ज्ञाप्यतेऽनेनेत्युपमानं सादृश्यज्ञानम्। एवं शप्यते निग्रहानुग्रहौ क्रियतेऽनेनेति शब्दः।

१ प्रमाणज्ञानस्य करणाधीनत्वात्करणं तावन्निर्वक्ति-असाधारणेति।

प्रश्नः १—करणस्य कारणस्य च किं लक्षणं, कस्तयोर्भेदः? (१९१५, १९२१)

प्रश्नः २—कारणस्य किं लक्षणम्? कतिविधं च तत्? (१९१७)

च्छादिवारणाय 'तज्जन्यत्वे सती'ति । कुलालजन्यत्वे सति कुलालजन्यघटजनकत्वं कुलालपुत्रस्याप्यस्त्यतस्तत्रातिव्याप्तिवारणाय प्रथमं सत्यन्तम् । दण्डरूपादिवारणाय 'तज्जन्यजनक' इति ॥

टी० — असाधारण कारण को करण कहते हैं।

कारणस्य किं लक्षणम् ?—

कार्यनियतपूर्ववृत्ति कारणम् ॥

(न्या०) कारणं लक्षयति—कार्यनियतेति । कार्यं प्रति नियतत्वे[1] सति पूर्ववृत्तित्वं—कारणत्वम् । 'नियतत्व'विशेषणानुपादाने पूर्ववर्तिनो रासभादेरपि घटादिकारणत्वं स्यादतो 'नियतत्वे सती'ति विशेषणम् । नियतपूर्ववर्तिनो दण्डरूपादेरपि घटकारणत्वं स्यादतः —'अनन्यथासिद्ध' पदमपि कारणलक्षणे निवेशनीयम् । एवं च न तत्रातिव्याप्तिः, दण्डरूपादीनां त्वन्यथासिद्धत्वात् ॥

(प०) कार्येति । कार्यात्-नियता = अवश्यंभाविनी—पूर्ववृत्तिः = पूर्वक्षणवृत्तिर्यस्य तत्तथेत्यर्थः । अनियतरासभादिवारणाय 'नियते'ति । कार्यवारणाय 'पूर्वे'ति । दण्डत्वादिवारणायाऽनन्यथासिद्धत्वविशेषणस्यावश्यकत्वेन तत एव रासभादिवारणसम्भवे नियतपदमनर्थकमेव । एवं चानन्यथासिद्धकार्यपूर्ववृत्ति कारणमिति फलितम् । अनन्यथा सिद्धत्वमन्यथासिद्धिशून्यत्वम् । अन्यथासिद्धिश्चावश्यक्लृप्तनियतपूर्ववर्तिभिर्दण्डादिभिरेव घटरूपकार्यसम्भवे तत्सहभूतत्वं [3]दण्डत्वादौ, तदन्यथासिद्धम् ॥

---

१ अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहित-प्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वमिति निष्कृष्टलक्षणम् ।

२ नियतत्वं व्यापकत्वम् । तद्घटकाभावश्च कार्याव्यवहितप्राक्क्षणावच्छिन्नो ग्राह्यः। एतत्तात्पर्यग्राहकमेव पूर्ववृत्तीति । तेन घटाद्युत्पत्त्यनन्तरं कपालादौ दण्डाद्यभावेऽपि न क्षतिः ।

३ अत्रादिपदेन दण्डरूपसंग्रहः ।

प्रश्नः १—कार्य-कारण-करणानां लक्षणानि प्रतिपादयत (१९३२)

टी०—जो कार्य की उत्पत्ति के पहले अवश्य रहे वह 'कारण' कहलाता है।

कार्य्यस्य लक्षणमिदम्—

कार्यं प्रागभावप्रतियोगि ॥

(न्या०) कार्यं लक्षयति—कार्यमिति। प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम्। कार्योत्पत्तेः पूर्वम् 'इह घटो भविष्यति' इति प्रतीतिर्जायते। एतत्प्रतीतिविषयीभूतो योऽभावः स प्रागभावः, तत्प्रतियोगि घटादिरूपं कार्यम्।

[प०] प्रागभावेति। कालादिवारणाय "[२]प्रागि"ति। असम्भववारणाय 'प्रतियोगी'ति।

टी०—जो पदार्थ प्रागभाव का प्रतियोगी होता है (अर्थात् जिसकी उत्पत्ति होने वाली है) वह कार्य कहलाता है।

कतिविधं कारणम्?—

कारणं[३] त्रिविधं—समवाय्यसमवायिनिमित्तभेदात् ॥

[न्या०] कारणं विभजते—कारणमिति। समवायिकारणम्, असमवायिकारणं, निमित्तकारणं चेति ॥

टी०—कारण तीन तरह का है—समवायि, असमवायि और निमित्त।

समवायिकारणस्य किं लक्षणम्?—

यत्समवेतं कार्यमुत्पद्यते[४] तत्समवायिकारणम्। यथा-

१ कार्यलक्षणस्य तत्समन्वयप्रकारस्य च न्यायबोधिन्यामेव स्पष्टत्वान्नोक्तम्।

२ कार्यस्य मूलोक्तलक्षणेऽपति प्राक्पदेऽन्योन्य भावप्रतियोगित्वस्य पदार्थमात्रे सत्त्वात्तस्य च सर्वत्र विद्यमानत्वरूपकेवलान्वयित्वेनान्योन्याभावप्रतियोगित्वान्नित्यानामपि कार्यत्वापत्तिः स्यादिति भावः।

३ भावकार्यमात्र एव कारणस्य त्रैविध्यमभ्युपेयम्। अभावकार्यमात्रे तु निमित्तकारणमात्रमपेक्षितमिति बोध्यम्।

४ उत्पद्यत इति सत्कार्यवादिसांख्यनिरासाय। स हि सत एव कार्यस्य कारणव्यापारैरभिव्यक्तिं मन्यते।

प्रश्नः १—कारणं कतिविधम्? प्रत्येकस्य लक्षणं सोदाहरणं ब्रूहि (१९१८, १९३६)

प्रश्नः १—समवायिकारणस्य लक्षणं सोदाहरणमुच्यताम्। (१९०२, १९०४, १९०९)

तन्तवः पटस्य । पटश्च-स्वगतरूपादेः ।

(न्या०] समवायिकारणं लक्षयति—यत्समवेतमिति । यस्मिन्समवेतं सत्=समवायेन सम्बद्धं-सत्–कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः । उदाहरणम्-यथा तन्तव इति । तन्तुषु समवायेन संबद्धं सत्पटात्मकं कार्यमुत्पद्यते तत्तन्तवः समवायिकारणमित्यर्थः । सामान्यलक्षणं तु समवायसंबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वं समवायिकारणत्वमिति । समवायसंबन्धेन घटाधिकरणे कपालादौ कपालादेः तादात्म्यसंबन्धेनैव सत्त्वात्, समवायसंबन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरुपित-तादात्म्यसंबन्धावच्छिन्नकारणतायाः कपालादौ सत्त्वाल्लक्षणसमन्वयः । समवायेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यस्यैव कारणत्वाज्जन्यभावेषु द्रव्य-गुण-कर्मसु त्रिषु द्रव्यमेव समवायिकारणम् । द्रव्ये तु द्रव्यावयवाः समवायिकारणम् । अतो गुणादावपि द्रव्यमेव समवायिकारणमित्याशयेनाह-पटश्च स्वगतरूपादेरिति । 'समवायिकारण'मित्यनुषज्यते ॥

(प०)यदिति। यस्मिन्समवायसम्बन्धेन वर्तमानं तदित्यर्थः । चक्रादिवारणाय 'समवेत'मिति ॥

टी०—जिस द्रव्यमें समवाय सम्बन्ध से कार्य उत्पन्न हो वह समवायिकारण है । जैसे कपड़े का समवायि कारण सूत है। और कपड़ा अपने रूप (सफेदी वगैरः) का समवायि कारण है ।

प्रश्नः २—सलक्षणान् सोदाहरणान् कारणभेदान् ब्रूत ।
(१९०१, १९०७, १९११, १९२५)

प्रश्नः ३—समवायिकारणासमवायिकारणलक्षणयोर्लक्ष्ये समन्वयः क्रियताम् । (१९२३)

प्रश्नः ४—समवायिकारणासमवायिकारणनिमित्तकारणानां लक्षणानि प्रदर्शनीयानि । घटस्य घटरूपस्य किं समवायिकारणम ? के चाऽसमवायिकारण-निमित्तकारणे (१९३५)

असमवायिकारणस्य किं लक्षणम् ?—

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य ।

(न्या०) असमवायिकारणं लक्षयति—कार्येणेति । कार्येण सहैकस्मिन्नर्थे समवेतं सत् यत् कारणं तत् असमवायिकारणमित्यन्वयः । कारणेन सहैकस्मिन्नर्थे समवेतं सत् यत् कारणं तदसमवायिकारणमित्यन्वयः । अत्र 'कारणेने'त्यस्य—स्वकार्यसमवायिकारणेनेत्यर्थः । जन्यद्रव्यमात्रे अवयवसंयोगस्यैवाऽसमवायिकारणत्वात्पटात्मककार्ये तदवयवतन्तुसंयोगस्यैवाऽसमवायिकारणत्वमिति दर्शयति—यथा तन्तुसंयोगः पटस्येति । पटात्मककार्येण सहैकस्मिन्नर्थे तन्तौ समवेतं सत्—समवायसंबन्धेन वर्तमानं सत्-पटात्मककार्यम्प्रति तन्तुसंयोगात्मकं कारणम्-असमवायिकारणमित्यर्थः । द्वितीयमसमवायिकारणं 'कारणेन सहे'त्यादिना पूर्वोक्तं, तदुदाहरति—तन्तुरूपमिति । कारणेन सह—पटरूपसमवायिकारणीभूतपटेन सह, एकस्मिन्नर्थे—तन्तुरूपेऽर्थे, समवेतं सत्—समवाय-

१ ननु समानाधिकरणयोरेव कार्यकारणभावो भवतीति व्याप्तिस्तथा च. तन्तुरूपं पटगतरूपस्याऽसमवायिकारणं न स्यात्तयोः समानाधिकरणत्वाऽभावादित्यत आह-कारणेन वेति । कार्यसमवायिकारणेनेत्यर्थः, तथा च पटस्य समवायिकारणं तन्तुसमुदायस्तत्र च तन्तुरूपस्यापि सद्भावः । इत्येवं स्वसमवायिसमवायसम्बन्धेन तन्तुरूपमपि पटगते तत्र च पटे पटरूपस्य सत्त्वाद्भवति कार्यकारणभावः । स्वपदेन तन्तुरूपस्य ग्रहणं बोध्यम् । न चैवम्परम्परासम्बन्धस्य कार्यकारणभावनियामकत्वे यावदसंश्लिष्टपदार्थानामपि कार्यकारणभावः स्यात्, परम्परासम्बन्धस्यानुगतत्वात् न हि जगति कोऽपि पदार्थः परम्परासम्बन्धेनाऽसम्बद्धोऽस्तीत्यत आह—कार्येण कारणेन वेति । तथा च यावत्परम्परासम्बन्धस्य नाश्रयणं किन्तु समवायस्य स्वसमवायिसमवायस्यैव वा । एतद्द्वयस्यैवात्र शास्त्रे कार्यैकार्थप्रत्यासत्तित्वेन कारणैकार्थप्रत्यासत्तित्वेन च व्यवहारः ।

प्रश्नः १—असमवायिकारणस्य लक्षणमुदाहरणं चोच्यताम् ।
(१९०६, १९१६, १९३०)

सम्बन्धेन वर्तमानं सत्-तन्तुरूपं, पटगतरूपं प्रति कारणं भवति अतोऽसमवायिकारणं-तन्तुरूपं पटगतरूपस्य । सामान्यलक्षणं तु-[1]'समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या 'समवाय'-'स्वसमवायिसमवेतत्वा'ऽन्यतरसम्बन्धावच्छिन्ना कारणता तदाश्रयत्वम्-असमवायिकारणत्वमिति। द्रव्यासमवायिकारणीभूतावयवसंयोगादौ तु समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यता[2]निरूपिता समवायसम्बन्धावच्छिन्ना कपालद्वयसंयोगनिष्ठा कारणता कपालद्वयसंयोगे वर्तते । एवमाद्यपतनक्रियायामाद्यस्यन्दनक्रियायां च गुरुत्वद्रवत्वे असमवायिकारणे भवतः। आद्यपतनक्रियां प्रति आद्यस्यन्दनक्रियां प्रति च समवायसम्बन्धेनैव तयोः कारणत्वात्। अवयविगुणादौ त्ववयवगुणादेः स्वसमवायिसमवेतत्वसम्बन्धेनैव कारणत्वात्, तत्सम्बन्धावच्छिन्नकारणताश्रयत्वमवयवगुणादौ वर्तते । अवयवगुणकपालतन्तुरूपादेः स्वशब्दग्राह्य-कपालरूपतन्तुरूप-समवायि-कपालतन्तु-समवेतत्वसम्बन्धेन घटपटादौ सत्त्वात् ।।

(५०) कार्येणेति। कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति आ[3]त्मविशेषगुणभिन्नत्वे सति यत् कारणं तत्-असमवायि-

१ कार्यकारणयोः सामानाधिकरण्यमपेक्षितं तच्च एकस्मिन्नधिकरणे वृत्तित्वम् । तत्र येन सम्बन्धेन कार्यस्य येन च कारणस्य वृत्तित्वमपेक्षितं तावुभौ क्रमेण कार्यतायाः कारणतायाश्चावच्छेदकसम्बन्धौ भवतः । द्विविधेऽपि असमवायिकारणस्थले एकस्मिन्नधिकरणे कार्यस्य समवायेनैव वृत्तित्वमपेक्षितमिति उभयत्रापि समवाय एव कार्यतावच्छेदकसम्बन्धः । कारणतावच्छेदकश्च प्रथमे समवायः, द्वितीये स्वसमवायिसमवेतत्वम् । स्वशब्देन असमवायिकारणतयाभिमतस्य तन्तुरूपादेर्ग्रहणं, तत्समवायिसमवायेनाश्रयः तन्त्वादिः, तत्र समवेतत्वं समवायेन वृत्तित्वं पटादौ इति पटात्मके एकस्मिन्नधिकरणे पटरूपात्मककार्यस्य समवायेन तन्तुरूपात्मककारणस्य स्वसमवायिसमवेतत्वसंबन्धेन वृत्तित्वात्स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्ना कारणता तन्तुरूपे अस्तीति बोध्यम् ।

२ अत्र निरूपिता च स्वरूपसम्बन्धविशेष एव बोध्यः ।

३ ननु आत्ममनःसंयोगादीनामात्मसामान्यगुणानां ज्ञानादिकम्प्रत्यसमवायिकार-

कारणम्। तन्तुसंयोगादावव्याप्तिवारणाय-[1]कार्येणेति। तन्तुरूपादावव्याप्तिवारणाय-कारणेनेति। आत्मविशेषगुणेऽतिव्याप्तिवारणायाऽऽत्मविशेषगुणभिन्नत्वे सतीति। विशेषवारणाय कारणमिति।

टी०—कार्य अथवा कारण के साथ एक ही स्थान में समवाय सम्बन्ध से वर्तमान होकर जो कारण रहे वह असमवायिकारण है। जैसे (१ कार्य का उदाहरण) पटका तन्तुसंयोगात्मक कारण असमवायिकारण है; (२ कारण का उदाहरण) तागों का रूप कपड़े के रूप का असमवायि कारण है।

निमित्तकारणस्य किं लक्षणम्?—

तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य।

(न्या०) निमित्तकारणं लक्षयति—तदुभयभिन्नमिति। समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणत्वमित्यर्थः॥

(प०) तदुभयभिन्नं कारणं निमित्त[2]कारणमिति। समवाय्यसमवायिकारणवारणाय 'तदुभयभिन्न'मिति। [3]विशेषादावतिव्याप्तिवारणाय 'कारण'मिति।

टी०—उन दोनों (समवायि और असमवायि) कारणों से भिन्न कारण को निमित्त कारण कहते हैं। जैसे, तुरी (जुलाहे का ताना) वेमा (बाना) आदि कपड़े के (निमित्त कारण हैं)।

णत्वेऽपि आत्मविशेषगुणानां ज्ञानादीनां कुत्राऽप्यसमवायिकारणत्वेनाक्लृप्तत्वात्तदनभ्युपगमः। न च ज्ञानादेरिच्छादिकम्प्रत्यसमवायिकारणत्वमस्त्विति वाच्यम्। अवश्यक्लृप्तात्ममनःसंयोगेनैव निर्वाहेऽन्यत्र तत्कल्पनस्यानुभवविरुद्धत्वादत आह—आत्मविशेषगुणभिन्नेति।

१ नित्यद्रव्यवृत्तिविशेषपदार्थस्य कुत्रापि कारणत्वं नास्तीति भावः। न च नित्यद्रव्यव्यावृत्तावेव तस्य कारणत्वमिति वाच्यम्। नित्यद्रव्यभेदस्य नित्यसिद्धत्वेन कार्यत्वाभावात् कार्ये कारणापेक्षेति नियमाच्च।

२ निमित्तकारणस्य लक्षणं न्यायबोधिन्यामेव स्पष्टमिति नोक्तम्।

३ अत्रत्यादिपदेनाऽणुपरिमाणाऽतीन्द्रियसामान्ययोर्ग्रहणम्।

कारणस्य निष्कृष्टमिदं लक्षणम्—

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ॥

(न्या०) तदेतदिति । यदसाधारणमिति । 'व्यापारवत्त्वे सती'त्यपि पूरणीयम् । अन्यथा तन्तु-कपालसंयोगयोरतिव्याप्तिः ! तन्तु-कपालसंयोगयोरपि कार्यत्वातिरिक्त-पटत्व-घटत्वावच्छिन्नम्प्रति कारणत्वादसाधारणत्वमस्त्येवेत्यतस्तत्र करणत्ववारणाय 'व्यापारवत्त्वे सती'ति करणलक्षणे विशेषणं देयम् । व्यापारत्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वम् । भवति हि दण्डजन्यत्वे सति दण्डजन्यघटजनकत्वाद्भ्रम्यादेर्दण्डव्यापारत्वम् । एवं कपालसंयोग-तन्तुसंयोगादेरपि [१]कपाल-तन्तुव्यापारत्वं, कपालतंतुजन्यत्वे सति कपाल-तंतुजन्य-घटपटजनकत्वात् । करणलक्षणेऽसाधारणत्वविशेषणानुपादाने ईश्वराऽदृष्टादेरपि व्यापारवत्कारणत्वस्य सत्त्वात्, अतस्तत्रातिव्याप्तिवारणाय—'असाधारणे'ति विशेषणम् ॥

(प०) तदेतदिति । यस्मात्कारणात्करणत्वघटकं कारणमुपदर्शितं तस्मादेतत्त्रिविधसाधकमध्ये यत्साधकतमं तदेव करणमिति भावः ॥ इति करणप्रपञ्चः ॥

टी०—इन तीनों कारणों में जो असाधारण कारण हो वह करण कहा जाता है ।

प्रत्यक्षप्रमाणस्य किं लक्षणम् ?—

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ॥

(न्या०) षड्विधेन्द्रियभूत—प्रत्यक्षप्रमाणस्य लक्षणमाह—तत्रेति । प्रमाभूतेषु प्रत्यक्षात्मकं यज्ज्ञानं चाक्षुषादिप्रत्यक्षं तत्प्रतिव्यापारवदसाधारणं कारणमिन्द्रियं भवति, अतः प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षस्य

---

१ समवायिकारणाऽपेक्षया कपालसंयोग-तन्तुसंयोगयोर्व्यापारत्वं घटपटरूपकार्यापेक्षया चाऽसमवायिकारणत्वम्, अत एकत्र धर्मिणि धर्मद्वयसमावेशस्य न विरोधः ।

लक्षणम् । आद्यसंनिकर्षातिरिक्तचतुर्विधसंनिकर्षाणां समवायरूपत्वेनेन्द्रियजन्यत्वाभावाद्व्यापारत्वं न सम्भवतीति इन्द्रियमनःसंयोगस्यैव बाह्यप्रत्यक्षे जननीये इन्द्रियव्यापारता बोध्या । मानसप्रत्यक्षे त्वात्म-मनःसंयोगस्यैव सा बोध्या ॥

(प०) तत्रेति । प्रमाणचतुष्टयमध्ये दण्डादिवारणाय 'ज्ञानेति ।' अनुमानादिवारणाय 'प्रत्यक्षे'ति ॥

टी०—प्रत्यक्ष ज्ञान का असाधारण कारण प्रत्यक्ष प्रमाण है ।

प्रत्यक्षज्ञानस्य (प्रत्यक्षप्रमाया वा) किं लक्षणम् ?—

[ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्] इन्द्रियार्थसंनिकर्षजन्यं ज्ञानं प्रत्यक्षम् । तद्द्विविधम् । निर्विकल्पकं, सविकल्पकं चेति ॥

(न्या०) प्रत्यक्षप्रमाणलक्षणमुक्त्वा प्रत्यक्षप्रमालक्षणमाह—ज्ञानाकरणकमिति । [2]क्षेपकं लक्षणमिदम् । ज्ञानं व्याप्तिज्ञानं, सादृश्यज्ञानं, पदज्ञानं च, करणं येषां ते ज्ञानकरणका अनुमित्युपमितिशाब्दाः । ज्ञानकरणकं न भवतीति ज्ञानाऽकरणकम् । (तत्त्वम्) प्रत्यक्षलक्षणम् । इदं लक्षणमीश्वरप्रत्यक्षसाधारणम् । ईश्वरप्रत्यक्षस्याजन्यत्वात्, जन्यप्रत्यक्षे च इन्द्रियाणामेव करणत्वं न तु ज्ञानस्येति तयोरुभयोः संग्रहः । इन्द्रियार्थसंनिकर्षेति । 'जन्यप्रत्यक्षस्यैव लक्ष्यत्वमि'त्यभिप्रायेणेदं लक्षणम् । प्रत्यक्षं विभजते—निर्विकल्पकमिति ॥

(प०) इन्द्रियार्थेति । इन्द्रियं=चक्षुरादिकम्, अर्थः=घटादिः,

---

१ इत्थमत्र सन्निकर्षपरम्परा, आत्मनो मनसा योगः । मनसश्चेन्द्रियेण । इन्द्रियस्यार्थेन । ततो घटादीनाम्प्रत्यक्षमिति ।

२ प्रकृतमन्थाघटकमित्यर्थः ।

प्रश्नः १—प्रत्यक्षं कतिविधं, किं लक्षणकं च ? (१९०६, १९३०)

तयोः संनिकर्षः = संयोगादिस्तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः । संनिकर्षध्वंसवारणाय 'ज्ञान'मिति । अनुमित्यादिवारणाय—'इन्द्रियार्थसंनिकर्षे'ति । ननु सोपनेत्रचक्षुषा कथं पदार्थग्रहणं, चक्षुष उपनेत्रनिरुद्धत्वेन पदार्थेन सह संनिकर्षाभावात् । कथं वा स्वच्छजाह्नवीसलिलावृतमत्स्यादेश्चक्षुषा ग्रहणमिति चेन्न । स्वच्छद्रव्यस्य तेजोनिरोधकत्वाभावेन तदन्तश्चक्षुःप्रवेशसम्भवात् । [1]न चेश्वरप्रत्यक्षेऽव्याप्तिरिति वाच्यम् । अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात् ।

टी०—[जिस ज्ञान में ज्ञान करण न हो वह प्रत्यक्ष ज्ञान है ।] (चक्षु आदि) इन्द्रियों और (घट पट आदि) विषयों के सन्निकर्ष (सम्बन्ध) से जो ज्ञान हो वह प्रत्यक्ष है । प्रत्यक्ष दो तरह का है-- निर्विकल्पक और सविकल्पक ।

निर्विकल्पस्य किं लक्षणम् ?—

तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् ॥

(न्या०) तल्लक्षयति—तत्र निष्प्रकारकमिति । प्रकारताशून्यज्ञानत्वमेव निर्विकल्पकत्वमित्यर्थः । निर्विकल्पके चतुर्थी विषयता स्वीक्रियते । न तु [2]त्रिविधविषयतामध्ये कापि तत्रास्ति अतो 'विशेष्यताशून्यज्ञानत्वं' 'संसर्गताशून्यज्ञानत्व'मित्यपि लक्षणं सम्भवति ॥

(प०) तत्र निष्प्रकारकमिति । सविकल्पकेऽतिव्याप्तिवारणाय निष्प्रकारकमिति । [3]प्रकारवारणाय 'ज्ञान'मिति ॥

टी०--जिसमें विशेष्य, विशेषण और सम्बन्ध का ज्ञान न हो वह निर्विकल्पक है ।

सविकल्पस्य किं लक्षणम् ?—

सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं

१ अत्रेन्द्रियार्थसन्निकर्षजन्यज्ञानस्य प्रत्यक्षलक्षणत्वे इत्यादिः । अव्याप्तिरिति ईश्वरप्रत्यक्षस्य चक्षुरादीन्द्रियशून्यत्वादिति शेषो बोध्यः ।

२ विशेष्यताख्यविषयता–प्रकारताख्यविषयता–संसर्गताख्यविषयताभेदेन विषयतायास्त्रैविध्यं बोध्यम् ॥

३ नीलो घट इत्यादिस्थले यद्यपि प्रकारेऽपि प्रकारान्तरस्य भासितत्वात्प्रकारवारणायेत्यभिधानमनर्थकम् । तथाऽप्ययं घट इत्यादिस्थले घटत्वस्य स्वरूपेण भानमतस्तदभिधानं सार्थकमिति भावः ।

ब्राह्मणोऽयं श्यामोऽयमिति ॥

(न्या०) सविकल्पकं लक्षयति—सप्रकारकमिति । विषयताया ज्ञाननिरूपितत्वाज्ज्ञानस्य विषयतानिरूपकत्वेन—[1]प्रकारतानिरूपकज्ञानत्वं सविकल्पकस्य लक्षणम् । एवं 'विशेष्यतानिरूपकज्ञानत्वं' 'संसर्गतानिरूपकज्ञानत्व'मित्यपि लक्षणं सम्भवति । उदाहरणम्—यथेति । इदन्त्वावच्छिन्न[2]विशेष्यतानिरूपितडित्थत्वप्रकारताशालिज्ञानं ब्राह्मणत्वप्रकारताशालिज्ञानं च सविकल्पकमित्यर्थः ।

(प०) सप्रकारमिति । घटादिवारणाय-ज्ञानमिति । निर्विकल्पकवारणाय सप्रकारकमिति ॥

टी०— जिसमें विशेष्य, विशेषण और उनके सम्बन्ध का ज्ञान हो वह सविकल्पक है । जैसे 'यह [3]डित्थ (काठ का हाथी,निपुण मनुष्य) है', 'यह ब्राह्मण है, 'यह श्याम है ।'

सन्निकर्षः कतिविधः ? इति प्रश्ने उत्तरम्—

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायो विशेषणविशेष्यभावश्चेति ॥

(न्या०) चक्षुषादिषड्विधप्रत्यक्षकारणीभूतान् षड्विधसन्निकर्षान्विभजते—संयोग इत्यादिना । द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नम्प्रति चक्षुःसंयोगः कारणम् । द्रव्यसमवेतवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नम्प्रति

---

१ प्रकारता च ज्ञानीयविशेष्यताविशेषः ।

२ विशेष्यतापि ज्ञानीयविशेष्यताविशेष एव ।

३ 'श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः ।
सर्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते ॥' इति हिन्दीटीकाकारः ।

प्रश्नः १—प्रत्यक्षज्ञानं प्रति कारणीभूताः सन्निकर्षाः के ? कानि च तदुदाहरणानि ? (१९०२, १९१६, १९१८, १९२२, १९२६, १९३२)

प्रश्नः २—इन्द्रियार्थसन्निकर्षान् सोदाहरणान्प्रदर्शयत (१९१०,१९२१,१९२५)

चक्षुःसंयुक्तसमवायस्य हेतुत्वम् । द्रव्यसमवेतसमवेतवृत्तिलौकिक-विषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नम्प्रति चक्षुःसंयुक्तसमवेतसम-वायस्य हेतुत्वम् । द्रव्यग्राहकाणीन्द्रियाणि चक्षुस्त्वङ्मनांसि त्रीण्येव । अन्यानि घ्राण-रसन-श्रवणानि गुणग्राहकाणि । अत-स्त्वगिन्द्रियस्थले द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन त्वाचप्रत्यक्ष-त्वावच्छिन्नम्प्रति त्वक्संयोगस्य हेतुता । एवं द्रव्यसमवेतत्वाचप्रत्यक्ष-त्वावच्छिन्नम्प्रति त्वक्संयुक्तसमवायस्य हेतुता । द्रव्यसमवेत-समवेतोष्णत्व-शीतत्वादिजातिस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसम-वायस्य हेतुता । एवमात्ममानसप्रत्यक्षे मनःसंयोगस्य हेतुता । आत्मसमवेतसुखादिमानसप्रत्यक्षे मनःसंयुक्तसमवायस्य हेतुता । आत्मसमवेतसमवेतसुखत्वादिमानसप्रत्यक्षे मनःसंयुक्तसमवेतसम-वायस्य हेतुता । रसन-घ्राणयोस्तु रस-गन्धतद्गतजातिग्राहकत्वेन द्वितीयतृतीययोः संनिकर्षयोरेव तत्र हेतुता वाच्या । श्रवणेन्द्रिय-स्याकाशरूपत्वेन शब्दस्याकाशगुणत्वेन श्रवणेन्द्रियेण च समं शब्दस्य समवायः संनिकर्षः । शब्दवृत्तिशब्दत्व-कत्व-खत्वादिजा-तिविषयकश्रावणप्रत्यक्षे समवेतसमवायस्य हेतुता । अभावप्रत्यक्षे विशेषण-विशेष्यभावो नाम विशेषणतासंनिकर्षः, पञ्चविधसन्निक-र्षोपरि विशेषणता योजनीया । तथा हि—द्रव्याधिकरणकाभाव-प्रत्यक्षे इन्द्रियसंयुक्तविशेषणता । द्रव्यसमवेताधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता । संयोगस्थाने संयुक्तपदं घट-यित्वा समवायस्थाने समवेतपदं घटयित्वा अभावप्रत्यक्षस्थले निर्वाह्यम् । तथा घटद्रव्यसमवेतं घटत्वं पृथ्वीत्वादिकं रूपादिकं च । तत्र नीलादौ पीतत्वाभावः घटत्वादिजातौ पटत्वाभावश्च वर्तते, स चाभावसंयुक्तसमवेतविशेषणतासंनिकर्षेण गृह्यते । एवं नीलत्वा-दिजातौ पीतत्वाभावोऽपीन्द्रियसंयुक्तसमवेतसमवेतविशेषणतासंनि-कर्षेण गृह्यते । घटसमवेतं नीलं तत्समवेतं नीलत्वं तद्विशेषणता पीतत्वाभावे वर्तते इति संक्षेपः ॥

(प०) प्रत्यक्षेति। तच्च प्रत्यक्षं षड्विधं घ्राणज-रासन-चाक्षुष-श्रौत्र-त्वाच-मानसभेदात्। ननु प्रत्यक्षकारणीभूतेन्द्रियनिष्ठप्रत्यक्षसामानाधिकरण्यघटकः संनिकर्षः कः ? इत्यपेक्षायां तं विभज्य दर्शयति--प्रत्यक्षेति। लौकिकप्रत्यक्षेत्यर्थः॥

टी०—विषय और इन्द्रियों का सन्निकर्ष (सम्बन्ध) प्रत्यक्ष ज्ञान का कारण है। यह सन्निकर्ष छः तरह का होता है--(१) संयोग (२) संयुक्तसमवाय (३) संयुक्तसमवेतसमवाय (४) समवाय (५) समवेतसमवाय और (६) विशेषण विशेष्यभाव।

द्रव्यप्रत्यक्षे कः सन्निकर्षः ?--

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।

[प०] संयोगमुदाहरति—चक्षुषेति। तथा च द्रव्यचाक्षुष-त्वाच-मानसेषु संयोग एव सन्निकर्ष इति भावः।

टी०--आंखसे घड़ेका प्रत्यक्ष ज्ञान करने में संयोग सन्निकर्ष होता है।

घटरूपप्रत्यक्षे कः सन्निकर्षः ?—

घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः। चक्षुःसंयुक्ते घटे रूपस्य समवायता॥

(प०)घटरूपेति। चक्षुषा इत्यनुषज्यते। तथा च द्रव्यसमवेतचाक्षुष-त्वाच-मानस-रासन-घ्राणजेषु संयुक्तसमवाय एव संनिकर्ष इत्यर्थः॥

टी०—घड़े के काला लाल पीला इत्यादि रंग के प्रत्यक्ष करने में संयुक्त समवाय सन्निकर्ष होता है। क्योंकि घड़े में नेत्र का संयोग है, और घड़े में अपना रंग समवाय सम्बन्ध से रहता है।

---

१ चक्षुःसंयुक्तकपाल-तन्तुसमवेतत्वेन घटपटादीनां प्रत्यक्षं भविष्यत्येवेति पूर्वपक्षाशयः। जीवात्म-परमात्मनोश्च निरवयवत्वेन स्वावयवसमवेतत्वाऽभावात्तादृशसम्बन्धेन प्रत्यक्षं न स्यादिति समाधानम्। आदिपदेन परमाणूनां ग्रहणम्। अतीन्द्रियाणामपि योगजधर्मेण प्रत्यक्षत्वाभ्युपगमादिति भावः।

प्रश्नः १—घटरूपस्य साक्षात्कारः, केनेन्द्रियेण भवति। कश्च तत्र सन्निकर्षः (१९०६)

प्रश्नः १—संयुक्तसमवेतसमवायसन्निकर्षस्य किमुदाहरणम्? (सन् १९००)

रूपत्वप्रत्यक्षे कः सन्निकर्षः ?—

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् ॥

(प०) रूपत्वेति । रूपत्वात्मकं यत्सामान्यं तत्प्रत्यक्ष इत्यर्थः। अत्रापि चक्षुषा इत्यनुषज्यते । तथा च द्रव्यसमवेतसमवेतचाक्षुष-रासन-घ्राणज-स्पार्शन-मानसेषु संयुक्तसमवेतसमवाय एव संनिकर्ष इति भावः । अथ द्रव्य-तत्समवेतप्रत्यक्षेपि संयुक्तसमवेतसमवाय एव सन्निकर्षोऽस्त्विति चेन्न तत् । ईश्वरात्मादे (आत्मसुखादे)-रनध्यक्षत्वप्रसङ्गात् ॥

टी०—रूप में रहने वाली रूपत्वजाति के प्रत्यक्ष करने में संयुक्तसमवेत समवाय सन्निकर्ष है क्योंकि चक्षु से संयुक्त हुआ घड़ा, उसमें समवेत हुआ रूप, उसमें भी रूपत्व का समवाय है ।

शब्दसाक्षात्कारे कः सन्निकर्षः—

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वात्, गुणगुणिनोश्च समवायात् ॥

शब्दत्वसाक्षात्कारे कः सन्निकर्षः ?—

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ॥

(प०) समवायसंनिकर्षमुदाहरति—श्रोत्रेणेति । 'जननीये'

प्रश्नः २—रूपत्वसामान्यस्य साक्षात्कारः केनेन्द्रियेण भवति, तत्र कः सन्निकर्षः ? (सन् १९०३, १९०९)

प्रश्नः १—शब्दस्य अभावस्य च साक्षात्कारे कः सन्निकर्षः ? तादृशः साक्षात्कारः कया प्रक्रियया सम्भवति (१९३६)

प्रश्नः १—शब्दत्वसाक्षात्कारः केनेन्द्रियेण भवति ? कश्च तत्र सन्निकर्षः ? (१९०५, १९०८)

इति शेषः। ननु श्रोत्र-शब्दयोः कथं समवाय इत्यपेक्षमाणं प्रति तमुपपाद्य दर्शयति—कर्णेति। अथ समवायस्य नित्यत्वेन शब्द-प्रत्यक्षे को व्यापार इति चेत्, शब्दः, श्रोत्रमनःसंयोगो वेति गृहाण। शब्दत्वेति। 'श्रोत्रेण जननीये' इत्यनुकर्षशेषौ॥

टी०—कान से शब्द के प्रत्यक्ष करने में समवाय सन्निकर्ष है। क्योंकि कान के छिद्र में जो आकाश है वही कर्णेन्द्रिय है, और शब्द आकाश का गुण है। गुण और गुणी का सम्बन्ध समवाय होता है।

शब्दत्व के प्रत्यक्ष करने में समवेत समवाय सन्निकर्ष है। क्योंकि श्रोत्र में समवेत शब्द है, उसमें शब्दत्व जाति समवाय सम्बन्ध से रहती है।

अभावप्रत्यक्षे कः सन्निकर्षः?—

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्॥

(प०) विशेषणेति। विशेषणभावो विशेष्यभावश्चेति बोध्यम्। इन्द्रियसम्बद्धविशेषणत्वमिन्द्रियसम्बद्धविशेष्यत्वमिति यावत्। विशेषणभावसंनिकर्षमुपपाद्य दर्शयति-घटाभाववदिति। 'इह भूतले घटो नास्ती'त्यादौ विशेष्यतासंनिकर्षोऽवसेयः। सप्तम्यन्तस्य विशेषणत्वात्॥

टी०—अभावों के प्रत्यक्ष करने में विशेषणविशेष्यभाव सन्निकर्ष है। क्योंकि 'घटाभाववद्भूतलम्' इस स्थल पर नेत्र से संयुक्त हुआ भूतल में घटाभाव विशेषण है।

प्रत्यक्षज्ञानस्य निष्कृष्टं लक्षणम्—

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्, तत्करणमिन्द्रियम्, तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्॥

(प०) प्रत्यक्षप्रमाणमुपसंहरति–एवमिति। उपदर्शितक्रमेणेत्यर्थः। ननु सिद्धान्ते प्रत्यक्षज्ञानकरणमिन्द्रियार्थसंनिकर्षः किं न स्यादिति चेन्नेत्याह—तत्करणमिति। प्रत्यक्षप्रमाणं निगमयति

तस्मादिति। प्रत्यक्षप्रमाकरणत्वादित्यर्थः। सिद्धमिति। न्याय-सिद्धान्ते सिद्धमित्यर्थः॥

टी०—इस तरह छ सन्निकर्षों से जो ज्ञान होता है वह प्रत्यक्ष कहा जाता है। इसका करण इन्द्रिय है। अतः इन्द्रिय प्रत्यक्ष प्रमाण है, यह सिद्ध हुआ।

इति पदकृत्यके प्रत्यक्षपरिच्छेदः॥

अथानुमानपरिच्छेदः।

अनुमानस्य किं लक्षणम्?—

अनुमितिकरणमनुमानम्।

(न्या०) अनुमानं लक्षयति—अनुमितीति। अनुमितौ [2]व्याप्तिज्ञानं करणम्, परामर्शो व्यापारः, अनुमितिः फलम्, कार्य-मित्यर्थः। परामर्शस्य व्याप्तिज्ञानजन्यत्वाद्व्याप्तिज्ञानजन्यानुमिति-जनकत्वात्तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वमुपपन्नम्। अनुमितिकरणत्वमनुमानस्य [3]लक्षणम्। अनुमानं व्याप्तिज्ञानम्। एतस्य परामर्शरूपव्यापारद्वारा अनुमितिं प्रत्यसाधारणकारणतया-नुमितिकरणत्वमुपपन्नम्॥

(प०) प्रत्यक्षानुमानयोः कार्यकारणभावसङ्गतिमभिप्रेत्य प्रत्य-क्षानन्तरमनुमानं निरूपयति—अनुमितीति। अनुमितेःकरणमनुमान-

---

१ ननु प्रत्यक्षानुमानयोः परस्परोपजीव्योपजीवकभावत्वेन प्रत्यक्षानन्तरमनुमान-निरूपणमित्याह—अनुमितीति। उपजीव्यते जन्यतेऽनेनेत्युपजीव्यं कारणम्। तथा च कार्य-कारणभावसंगत्या प्रत्यक्षानन्तरमनुमाननिरूपणमिति भावः। संगतिश्च षोढा। तथा हि—

"सप्रसंग उपोद्घातो हेतुताऽवसरस्तथा।
निर्वाहकैककार्यैक्यं षोढा संगतिरिष्यते॥"

२ व्याप्तिपदार्थस्तु—प्रतियोग्यसमानाधिकरण-यत्समानाधिकरणाऽत्यन्ताभावप्र-तियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यरूपो बोध्यः।

३ एतल्लक्षणमग्रे मूल एव स्पष्टम्।

प्रश्नः १—अनुमितेर्लक्षणं तत्करणं चोच्यताम्—(१९०२)

मित्यर्थः। तच्च लिङ्गपरामर्श एवेति निवेदयिष्यते। कुठारादावतिव्याप्तिवारणाय [1]अनुमितीति। प्रत्यक्षादावतिव्याप्तिवारणाय अन्विति।

टी०—अनुमिति का करण अनुमान है।

अनुमितेः किं लक्षणम्?—

परामर्शजन्यं ज्ञानमनुमितिः।

(न्या०) परामर्शजन्यमिति। परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितेर्लक्षणम्। अत्र ज्ञानत्वमात्रोपादाने प्रत्यक्षादावतिव्याप्तिः, अतस्तद्वारणाय परामर्शजन्यत्वे सतीति विशेषणोपादानम्। परामर्शजन्यत्वमात्रोक्तौ परामर्शध्वंसेऽतिव्याप्तिरतस्तद्वारणाय ज्ञानत्वोपादानम्॥

(प०) नन्वनुमितेरेव दुर्निरूपत्वात्तद्घटितानुमानमपि दुर्निरूपमित्यत आह—परामर्शेति। प्रत्यक्षादावतिव्याप्तिवारणाय परामर्शजन्यमिति। परामर्शध्वंसवारणाय ज्ञानमिति। परामर्शप्रत्यक्षवारणाय हेत्व[2]विषयकमित्यपि बोध्यम्॥

टी०—परामर्श से उत्पन्न ज्ञान अनुमिति कहलाता है।

परामर्शस्य किं लक्षणम्? किं च तत्स्वरूपमिति?—

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः।

---

१ अनुपूर्वकान्मिनोतेः स्त्रियां भावे क्तिनि निष्पन्नस्याऽनुमितिशब्दस्य अनु प्रत्यक्षादितः पश्चान्मीयते इति करणव्युत्पत्याऽनुमानरूपोऽर्थो बोध्यः।

२ हेत्वविषयकमित्यपीति। वह्निव्याप्यधूमवान् पर्वत इत्याकारकज्ञानविषयकज्ञानवानहमित्यत्रानुव्यवसायात्मकद्वितीयज्ञानस्य पूर्वपरामर्शरूपज्ञानजन्यत्वात् विषयतासम्बन्धेन व्यवसायस्यानुव्यवसाये हेतुत्वनियमादतो हेत्वविषयकमित्युक्तम्।

प्रश्नः १—'व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः' इत्यत्र व्याप्तेः पक्षधर्मतायाश्च स्वरूपं प्रदर्श्य, अनुमानस्य कतिविधत्वं तदुच्यताम्? (१९१६)

प्रश्नः २—परामर्शस्य किं लक्षणम्? तेन अनुमितेः कः सम्बन्धः? (१९२७)

तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः ॥

(न्या०) अनुमितिलक्षणघटकीभूतपरामर्शलक्षणमाचष्टे—'व्याप्तिविशिष्टेति । व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारये—'विशिष्ट'पदस्य प्रकारतानिरूपकत्वात्, 'पक्ष'धर्मताज्ञान'मित्यत्र षष्ठ्या विषयत्वबोधनात्, 'धर्मता'पदस्य सम्बन्धनार्थकत्वाच्च, कर्मधारयसमासे समस्यमानपदार्थयोरभेदसंसर्गलाभेन च, व्याप्तिप्रकारकाभिन्नं यत्पक्षसम्बन्धविषयकं ज्ञानं तत्परामर्श इति लभ्यते। एवं सति 'धूमो वह्निव्याप्यः', 'आलोकवान्पर्वतः' इत्याकारकसमूहालम्बने परामर्शलक्षणमस्तीत्यतिव्याप्तिस्तद्वारणाय पक्षनिष्ठविशेष्यतानिरूपिता या हेतुनिष्ठा प्रकारता, [3]तन्निरूपिता या व्याप्तिनिष्ठा प्रकारता, तच्छालि ज्ञानं परामर्श इति निष्कर्षः । एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणम् । अनुमितिपरामर्शयोर्विशिष्य कार्यकारणभावश्चेत्थम् ॥ पर्वतत्वावच्छिन्नोद्देश्यतानिरूपित-संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्न-विधेयताकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्तिप्रकारतानिरूपिता या धूमत्वावच्छिन्नप्रकारता तन्निरूपिता पर्वतत्वावच्छिन्ना विशेष्यता तच्छालिनिर्णयः कारणम् । स च निर्णयः 'वह्निव्याप्यधूमवान्पर्वतः' इत्याकारको बोध्यः ।

---

१ व्याप्तिविशिष्टे यत्पक्षधर्मताज्ञानमिति सप्तमीसमासे परामर्शत्वस्य व्याप्त्यनवगाहि'धूमवान्पर्वतः' इत्यादिज्ञानसाधारण्यापत्तेराह- व्याप्तिविशिष्टमिति ।

२ पक्षधर्मतायाः ज्ञानमिति विग्रहवाक्यस्थषष्ठ्येत्यर्थः ।

३ प्रकारत्व-विशेष्यत्वयोः परस्परं निरूप्य-निरूपकभावोऽस्ति, न तु प्रकारतानिरूपिता प्रकारता भवति विशेष्यतानिरूपिता वा विशेष्यता, तथापि समानाधिकरणविषयतयोरेकत्वाभिमानेन हेतुनिष्ठप्रकारतानिरूपिता या व्याप्तिनिष्ठप्रकारतेत्युक्तम् । परामर्शे हेतौ व्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यतायाः पक्षनिष्ठविशेष्यतानिरूपितप्रकारतायाश्च सत्त्वात्तयोः सामानाधिकरण्यनिमित्तकाभेदाध्यवसाये हेतुनिष्ठपक्षनिरूपितप्रकारतायामपि व्याप्तिनिरूपितविशेष्यतात्वाभिमानात् तस्यां च व्याप्तिनिष्ठप्रकारतानिरूपकत्वस्य सत्त्वात् हेतुनिष्ठप्रकारतानिरूपिता व्याप्तिनिष्ठप्रकारतेत्युक्तमिति भावः ।

(प०) व्याप्तिविशिष्टेति। [1]विषयितासम्बन्धेन व्याप्तिविशिष्ट-पक्षधर्मताज्ञानं परामर्श इत्यर्थः। घटादिज्ञानवारणाय 'पक्षधर्मते'ति 'धूमवान्पर्वत' इत्यादिज्ञानवारणाय—व्याप्तिविशिष्टेति। तदिति। परामर्शजन्यमित्यर्थः।

टी०—'व्याप्ति विशिष्ट हेतु पक्ष में है'—इस ज्ञान का नाम परामर्श है। जैसे, 'यह पर्वत अग्निव्याप्ति विशिष्ट धूम वाला है'—यह ज्ञान परामर्श है। और इस (परामर्श) से उत्पन्न हुआ 'पर्वत अग्निवाला है'—यह ज्ञान अनुमिति है।

व्याप्तेः किं लक्षणम्?—

यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः।

(न्या०) यत्र यत्रेति। 'यत्र' पदवीप्सावशाद्धूमाधिकरणे यावति वह्निमत्त्वलाभाद्यावत्पदमहिम्ना वह्नेर्धूमव्यापकत्वं लब्धम्। तदेव स्पष्टयति—साहचर्यनियम इति। एतदर्थस्तु 'नियतसाहचर्यं व्याप्ति'रिति। नियतत्वं व्यापकत्वम्॥ साहचर्यं नाम सामानाधिकरण्यम्। तथा च धूमनियतवह्निसामानाधिकरण्यं व्याप्तिरित्यर्थः। अत्र वह्नेर्धूमव्यापकत्वं नाम धूमसमानाधिकरणाऽत्यन्ताभावप्रतियोगितानवच्छेदकधर्मत्त्वम्। तथा हि—धूमाधिकरणे पर्वत-चत्वर-महानसादौ वर्तमानो योऽभावः घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावः, न तु वह्नित्वावच्छिन्नप्रतियोगिताकाभावः। कुतः? पर्वतादौ वह्नेः सत्त्वात्। एवं सति धूमाधिकरणे पर्वतचत्वरादौ वर्तमानस्य घटाद्यभावस्य प्रतियोगितावच्छेदकघटत्वादिकमनवच्छेदकं वह्नित्वं वह्नौ वर्ततेऽतो धूमव्यापकत्वं वह्नौ वर्तते। इयमन्वयव्याप्तिः सिद्धान्तानुसारेण। पूर्वपक्षव्याप्तिस्तु—साध्याभाववदवृत्तित्वम्। 'साध्यतावच्छेदकसम्बन्धा[2]वच्छिन्नसाध्यतावच्छेदका[3]-

---

१ विषयिता नाम ज्ञानधर्मविशेषः, विषयता च विषयधर्मविशेषः। विषयितासम्बन्धेन वस्तुमात्रज्ञाने। विषयतासम्बन्धेन च ज्ञानमात्रं वस्तु न वर्तते एवेति बोध्यम्।

२ वह्निमान्धूमादित्यादौ समवायेन वह्न्यभावमादायाव्याप्तिवारणाय प्रतियोगितायां प्रथममवच्छिन्नान्तं विशेषणम्।

३ तत्रैव महानसीयवह्न्याद्यभावमादायाव्याप्तिवारणाय द्वितीयमवच्छिन्नान्तम्।

वह्निछिन्नप्रतियोगिताकप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियो-गितावच्छेदकावच्छिन्नवैयधिकरण्या[1] वह्निछिन्नाऽभाववन्निरूपितहेतु-तावच्छेदकसम्बन्धा[2]वच्छिन्नवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाऽभाव[3] इति निष्कर्षः। [4]तच्च केवलान्वयिन्यव्याप्तमिति सिद्धान्तानुसरणम्॥

(५०) यत्र यत्रेति। 'यत्र यत्र धूमस्तत्र तत्राग्नि'रिति व्याप्तेर[5]भिनयः। यत्र 'साहचर्यनियम' इति लक्षणम्। सह चरतीति-सहचरस्तस्य भावः साहचर्यं, सामानाधिकरण्यमिति यावत्। तस्य नियमो व्याप्तिरित्यर्थः स चाऽव्यभिचरितत्वम्। तच्च व्यभिचाराभावः। व्यभिचारश्च साध्याभाववद्वृत्तित्त्वम्। तथा च साध्याभाववद्वृत्तित्वं व्याप्तिरिति पर्यवसन्नम्। 'महानसं वह्निमद्, धूमा'दित्यादौ साध्यो वह्निस्तदभाववान्-जलहृदादिस्तद्वृत्तित्वं नौकादौ,अवृत्तित्वं प्रकृते हेतुभूते धूमे-इति कृत्वा लक्षणसमन्वयः। 'धूमवान् वह्ने'रित्यादौ साध्यो धूमः, तदभाववत्-अयोगोलकं, तद्वृत्तित्वमेव-वह्न्यादाविति नातिव्याप्तिः॥

टी०—जहां जहां धुआं रहता है वहां वहां आग रहती है, यह साथ रहने का नियम व्याप्ति कहलाता है।

पक्षधर्मता का? इति प्रश्ने उत्तरम्—

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता॥

१ कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिवारणायाभावे वैयधिकरण्यावच्छिन्नांतं विशेषणम्, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनो यदनधिकरणं तद्वृत्तिरिति तस्यार्थः।

२ वह्निमान्धूमादित्यादौ तादृशसाध्याभावाधिकरणे स्वावयवे धूमस्य समवायेन वृत्तित्वादव्याप्तिरतस्तद्वारणाय वृत्तित्वे हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणम्।

३ धूमवान्वह्नेरित्यादौ ह्रदादिरूपयत्किंचित्साध्याभावाधिकरणवृत्तित्वाभावस्य वह्नौ सत्त्वादतिव्याप्तिरतस्तद्वारणाय वृत्तित्वसामान्याभावो विवक्षित इति बोध्यम्।

४ इदं वाच्यं ज्ञेयत्वादित्यादौ।

५ अंगुलिनिर्देशेन पदार्थप्रकाशनमेव ह्यभिनयपदार्थः।

प्रश्नः १—पक्षधर्मता–परामर्श–सामान्य-शब्दानामर्था लेख्याः (१९२२)

(प०) ननु ज्ञातेयं व्याप्तिः, 'पक्षधर्मताज्ञान'मित्यत्र का नाम पक्षधर्मता ? इत्यपेक्षमाणं प्रति तत्स्वरूपं निरूपयति--व्याप्यस्येति । व्याप्यो नाम व्याप्त्याश्रयः । स च धूमादिरेव, तस्य पर्वतादिवृत्तित्वं पक्षधर्मतेत्यर्थः ॥

टी०—व्याप्ति विशिष्ट (धूम) का पर्वत आदि में रहना ही पक्षधर्मता कहलाता है ।

कतिविधमनुमानम् ?—

अनुमानं द्विविधं-स्वार्थं परार्थञ्च ॥

(न्या०) अनुमानं विभजते–स्वार्थमिति ।

(प०) अथ कथमनुमानमनुमितिकरणं कथं वा तस्मादनुमितेर्जनिरिति जिज्ञासमानं प्रति लाघवादनुमानविभागमुखेनैव बुबोधयिषुरनुमानं विभजते--अनुमानमिति । द्वैविध्यं दर्शयति--स्वार्थं परार्थं चेति ।

टी०—अनुमान दो तरह का है—स्वार्थ और परार्थ ।

किन्नाम स्वार्थोऽनुमानम् ?—

स्वार्थं स्वानुमितिहेतुः । तथा हि---स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति, 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति 'तदनन्तरं वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरा-

१ एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीति नियमादिति भावः ।

प्रश्नः १ —अनुमानं कतिविधम् ? किं च तस्य लक्षणम् ? विशदीकृत्य प्रदर्श्यताम् ? (१९३०)

प्रश्नः २—स्वार्थानुमानं सोदाहरणं प्रदर्शयत (१९०९)

प्रश्नः ३—अनुमानस्य स्वार्थपरार्थभेदात् को भेदः (१९११,१९२२,१९३६)

मर्श इत्युच्यते । तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते तदेव स्वार्थानुमानम् ॥

(न्या०)स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमानम् ॥

(प०) स्वस्यार्थः=प्रयोजनं यस्मात् तत्-स्वार्थमिति समासः। स्वप्रयोजनं च स्वस्यानुमेयप्रतिपत्तिः । एवं परार्थमित्यस्यापि । अयमिति । व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम् । तच्च धूमादि । तस्य परामर्शः=ज्ञानविशेष इत्यर्थः । तस्मादिति । लिङ्गपरामर्शादित्यर्थः । स्वार्थानुमानमुपसंहरति—तदेतदिति ।। यस्मादिदं स्वप्रतिपत्तिहेतुस्तस्मादेतत्स्वार्थानुमानमित्यर्थः ॥

टी०—अपनी अनुमति के हेतु को स्वार्थानुमान कहते हैं । जैसे स्वयं ही वारवार देखने से जहां २ धुंआ रहता है वहां २ आग रहती है इस तरह से महानस (पाकशाला) आदि में व्याप्ति का निश्चय कर (कोई आदमी) पहाड़ के पास गया, वहां अग्नि है या नहीं ऐसा सन्देह कर पहाड़ में धुंआ देख कर 'जहाँ धुंआ रहता है वहां आग होती है' इस व्याप्ति का स्मरण करता है । इसके वाद 'वह्निव्याप्य धूमवाला यह पर्वत है'-यह ज्ञान उत्पन्न होता है । यही ज्ञान लिङ्गपरामर्श है । इस ज्ञान से 'पर्वत अग्निवाला है' यह ज्ञान उत्पन्न होता है । यही स्वार्थानुमान है ।

\४१\ परार्थानुमानस्य किं लक्षणम् ? तत्स्वरूपञ्च किमिति ?—

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम् । यथा पर्वतो वह्निमान् धूमवत्त्वात् । यो यो धूमवान्स स वह्निमान् । यथा महानसम् । तथा चायम् । तस्मात्तथेति । अनेन प्रतिपादितात्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते ।

(न्या०) [1]न्यायप्रयोज्यानुमानं परार्थानुमानम् । न्यायत्वं च

१ प्रयोज्यत्वञ्च साक्षात्परंपरया वा जन्यत्वम् ।

प्रश्नः४—स्वार्थानुमानं परार्थानुमानं चोदाहरणद्वारा प्रदर्श्यताम् । (१९१७)

प्रश्नः५—अनुमानस्य द्वैविध्यं सुस्पष्टं निरूप्यावयवा निरुप्यन्ताम् (१९२४)

[1]प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम्। अवयवत्वं च [2]प्रतिज्ञाद्यन्यतमत्वम्॥

(प०) क्रमप्राप्तं परार्थानुमानमाह—यत्त्विति । 'यत्पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमान'मिति सम्बन्धः । पञ्चावयवेति । अथावयवत्वं नाम द्रव्यसमवायिकारणत्वम् । प्रतिज्ञादिषु तदसंभवात्कथमेतेऽवयवाः स्युः—इति चेदनुमानवाक्यैकदेशत्वात्तु 'अवयवा' इत्युपचर्यत इति गृहाण । नन्वेवमपि पञ्चावयववाक्यस्यानुमानत्वमेव न विचारसहं, तस्य लिङ्गपरामर्शत्वाभावादिति चेन्मैवम् । लिङ्गपरामर्श[3]प्रयोजकलिङ्गप्रतिपादकत्वेनानुमानमित्यु[4]पचारमात्रत्वात् तदुदाहरति–यथेति । तथा चायमिति । अयं च पर्वतस्तथा वह्निव्याप्यधूमवानित्यर्थः । तस्मात्तथेति । वह्निव्याप्यधूमवत्त्वाद्वह्निमानित्यर्थः । अनेनेति । अनेन पञ्चावयववाक्येनेत्यर्थः ॥

टी० —स्वयं धुँए से अग्नि का अनुमान करके दूसरे मनुष्य को समझाने के लिए जो पञ्चावयव वाक्य का प्रयोग किया जाता है, वह परार्थानुमान है। जैसे, 'पर्वत वह्नियुक्त है, क्योंकि इसमें धुँआ है' 'जहां २ धुंआ रहता है वहां २ आग रहती है' जैसे रसोई घरमें, 'यह पर्वत भी वैसा (धूम युक्त) है' इस लिए वैसा (अग्नियुक्त) है । इस तरह प्रतिपादित लिङ्ग से दूसरा मनुष्य भी पर्वत में वह्नि का अनुमान कर लेता है ।

पञ्चावयवाः के ?—

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः ।

१ स्वार्थानुमानेऽपि प्रतिज्ञाहेत्वोः सत्त्वात्तद्वारणाय पञ्चकसमुदायत्वमिति ।

२ प्रतिज्ञाद्यन्यतमत्वं नाम प्रतिज्ञादिप्रतियोगिकभेदपञ्चकावच्छिन्नप्रतियोगिताकभेदवत्त्वम् । प्रतिज्ञादिषु पञ्चसु प्रत्येकस्मिन् स्वस्वप्रतियोगिकभेदाभावाद्भेदचतुष्टयसत्त्वेऽपि भेदपञ्चकस्याभावेन 'प्रतिज्ञाभेदादिभेदपञ्चकवान्न' इत्याकारकप्रतीतिसाक्षिकभेदस्य प्रत्येकं प्रतिज्ञादिषु सत्त्वेन लक्षणसमन्वयः । 'प्रतिज्ञाभेदादिभेदपञ्चकवान्न' इत्याकारकभेदस्य प्रतियोगिता तादृशभेदपञ्चकवति तदवच्छेदकं तादृशभेदपञ्चकमिति 'प्रतिज्ञाभेदादिभेदपञ्चकवान्न' इत्ययं भेदः प्रतिज्ञादिप्रतियोगिकभेदपञ्चकावच्छिन्नप्रतियोगिताको बोध्यः ।

३ साक्षात्परम्परा वा कारणत्वमेव हि प्रयोजकत्वम् ।

४ मुख्यव्यवहाररूपो ह्युपचारशब्दार्थः ।

प्रश्नः १---न्यायावयवाः के, किञ्च तत्फलम् ? (१९१०, १९२६)

पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान् स स वह्निमानित्युदाहरणम् । तथा चायमित्युपनयः । तस्मात्तथेति निगमनम् ॥

(प०) ननु 'पञ्चावयववाक्य'मित्यत्र के ते पञ्चावयवाः ? अतस्तान्दर्शयति—प्रतिज्ञेति । प्रतिज्ञाद्यन्यतमत्वमवयवत्वम् । साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा । पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं-हेतुः । व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणम् । उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः । पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनम् । इदमेव लक्षणं हृदि निधाय प्रतिज्ञादीन्विशिष्य दर्शयति—पर्वतो वह्निमानित्यादिना ॥

टी०—प्रतिज्ञा, हेतु, उदाहरण, उपनय और निगमन-ये पांच अवयव कहलाते हैं। पर्वत वह्नियुक्त है' इसका नाम प्रतिज्ञा है, 'धूमयुक्त होने से' यह हेतु है। 'जो जो धूमयुक्त होता है वह वह वह्नियुक्त होता है' यथा पाकशाला यह उदाहरण है । 'यह (पर्वत) भी वैसा ही है,' इसका नाम उपनय है । 'इस लिए वैसा (अग्नियुक्त) है' यह निगमन है।

स्वार्थानुमिति-परार्थानुमित्योः किं करणम् ?—

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्[1] । तस्माल्लिङ्गपरामर्शोऽनुमानम्[2] ॥

(प०) लिङ्गेति । 'ज्ञायमानं लिङ्गमनुमितिकरण'मिति वृद्धोक्तं न युक्तम्, 'इयं यज्ञशाला वह्निमती, अतीतधूमा'दित्यादौ लिङ्गाभावेऽप्यनुमितिदर्शनादित्यभिप्रायवल्लिङ्गपरामर्श एव कारणमित्याचष्टे—लिङ्ग-परामर्श एवेति । अनुमानमुपसंहरति—तस्मादिति । अनुमि-

१ लिंगपरामर्शतत्कारणव्याप्तिज्ञानमेवाऽनुमितिकरणमित्यर्थः ।
२ लिंगपरामर्शतत्कारणीभूतज्ञानमनुमानमित्यर्थः ।

प्रश्नः २—वाक्यस्य पञ्चावयवा निरूपणीयाः (१९२७)

तिकरणत्वादित्यर्थः । [1]अयमेव तृतीयज्ञानमित्युच्यते । तथा हि—महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमम् । पक्षे यद्धूमज्ञानं तद्द्वितीयम् । [2]अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम् । इदमेव 'लिङ्गपरामर्श' इत्युच्यते । अनुमानमिति । 'व्यापारवत्कारणं करण'मिति मते व्याप्तिज्ञानमेवानुमानं, [3]लिंगपरामर्शो व्यापार इत्यवसेयम् ॥

टी०—स्वार्थानुमिति और परार्थानुमिति इन दोनों का करण लिङ्गपरामर्श है। इसलिए लिङ्गपरामर्श ही अनुमान प्रमाण है।

कतिविधं लिंगम् ? व्यतिरेकिणश्च किं लक्षणम् ?—

लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि । यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति । यथा ह्रद इति व्यतिरेकव्याप्तिः ॥

(न्या०) अन्वयेनेति । व्यापकसामानाधिकरण्यरूपव्याप्तिमानित्यर्थः । व्यतिरेकेणेति । व्यतिरेको नामाऽभावः । तथा च साध्याभावहेत्वभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः । इयं च

१ लिंगपरामर्श एवेत्यर्थः ।

२ परामर्श एवेत्यर्थः ।

३ फलायोगव्यवच्छिन्नं कारणं करणमिति मते तु मूलोक्तरीत्या परामर्शस्यापि करणत्वमस्त्विति भावः ।

प्रश्नः१—लिङ्गं कतिविधं ? कानि च तेषां लक्षणान्युदाहरणं चोच्यताम् ।
(१६१०, १६१७, १९२०, १९२३, १९२५, १६२८, १९३६)

प्रश्नः२—अन्वयव्यतिरेकिणो लक्षणं सोदाहरणं प्रतिपाद्यताम् (१६३३)

व्याप्तिः—'यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव' इति। यत्र [1]पदवी-प्सयावह्न्यभाववति यावति धूमाभावग्रहणे यावत्पदस्य व्यापकत्वपर-तया धूमाभावे वह्न्यभावव्यापकत्वं लभ्यते। [2]एवञ्च वह्न्यभावनि-ष्ठव्याप्तेः स्वा[3]श्रयीभूतवह्न्यभावव्यापकीभूताऽभावप्रतियोगित्वसम्ब-न्धेन धूमनिष्ठतया व्यतिरेकव्याप्तिमत्त्वेन (धूमवत्त्वम्) व्यतिरेकि-त्वेन, धूमव्यापकवह्निसामानाधिकरण्यरूपान्वयव्याप्तिमत्त्वेनाऽन्वयि-त्वेन च [4]गीयते। व्यतिरेकपरामर्शस्तु '[5]वह्न्यभावव्यापकीभूता-भावप्रतियोगिधूमवान्पर्वत' इत्याकारकः॥

(५०) अन्वयव्यतिरेकिणो लक्षणमाह—अन्वयेति। तृती-यायाः प्रयोज्यत्वमर्थः। साध्यसाधनयोः साहचर्यमन्वयः। तदभा-वयोः साहचर्यं व्यतिरेकः। तथा चाऽन्वयप्रयोज्यव्याप्तिमद्व्यतिरे-कप्रयोज्यव्याप्तिमदन्वयव्यतिरेकीत्यर्थः। केवलव्यतिरेकिण्यतिव्याप्ति-वारणाय—अन्वयेनेति। केवलान्वयिनि व्यभिचारवारणाय व्यतिरेके-णेति। तथा चान्वयव्याप्तिरुपदर्शितैव। व्यतिरेकव्याप्तिश्च [6]साध्या-भावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः। तदुक्तम्—

"व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते॥
अन्वयः साधनं व्याप्यं साध्यं व्यापकमिष्यते।

---

१ वीप्सा द्विरुच्चारणम्।

२ धूमाभावे वह्न्यभावव्यापकत्वग्रहे वह्न्यभावे धूमाभावव्याप्यत्वस्य तुल्यवृत्ति-वेद्यतया ग्रहादिति भावः।

३ अत्र स्वपदेन वह्न्यभावनिष्ठव्याप्तेर्ग्रहणम्।

४ व्याप्तिरिति शेषोऽत्र बोध्यः।

५ वह्न्यभावस्य व्यापकीभूतो योऽभावो धूमाभावस्तत्प्रतियोगी यो धूमस्तद्वान् पर्वत इत्यर्थः।

६ वह्निमान् धूमादित्यादौ वह्निरूपसाध्याऽभावस्य व्यापकीभूतो योऽभावो धूमा-भावस्तत्प्रतियोगित्वस्य धूमे सत्त्वाल्लक्षणसमन्वयः।

साध्याभावोऽन्यथाव्याप्यो व्यापकः 'साधनात्ययः' ॥ इति ॥

टी०—लिङ्ग तीन प्रकार का है—अन्वयव्यतिरेकि, केवलान्वयि और केवलव्यतिरेकि। जिस लिङ्ग में अन्वय और व्यतिरेक ये दोनों व्याप्ति हों वह अन्वय व्यतिरेकि है। जैसे, वह्नि सिद्ध करने में धूम हेतु अन्वयव्यतिरेकि है। जहां धूम है वहां वह्नि है, जैसे पाकशाला में, यह अन्वयव्याप्ति है। जहां वह्नि नहीं है वहां धूम भी नहीं है जैसे तालाब में, यह व्यतिरेकव्याप्ति है।

केवलान्वयिनः किं लक्षणम् ?—

अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात्पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च ॥

(न्या०) केवलान्वयिनो लक्षणमाह—अन्वयेति। केवलान्वयिसाध्यकत्वं हेतोः केवलान्वयित्वम्, साध्ये केवलान्वयित्वं चात्यन्ताभावाप्रतियोगित्वम्। तथा च—अभावाऽप्रतियोगिसाध्यकत्वं केवलान्वयिहेतोर्लक्षणम्। एतच्च लक्षणं [2]हेतोर्व्यतिरेकित्वेऽपि संगच्छते। साध्यस्य केवलान्वयित्वादेव व्यतिरेकव्याप्तेरभावात्—'अन्वयमात्रव्याप्तिकं केवलान्वयी'ति मूलकारोक्तं लक्षणमुपपन्नम्। न चात्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वमाकाशाभावे संयोगाभावे चाव्याप्तमिति वाच्यम्। [3]स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वस्यैव

---

१ साधनाऽभाव इत्यर्थः।

२ अत्यन्ताभावप्रतियोगित्वेऽपीत्यर्थः।

३ स्वविरोधीति। अत्र 'स्वविरोधि—वृत्तिमत्' इति विशेषणद्वयमत्यन्ताभावस्य। स्वाविरोधी वृत्तिमांश्च योऽत्यन्ताभावस्तत्प्रतियोगिभिन्नत्वमित्यर्थः। स्वविरोधीत्यस्य स्वाधिकरणावृत्तिरर्थः। स्वपदेन लक्षणघटकीभूतात्यन्ताभावप्रतियोगित्वेनाभिमतस्य ग्रहणम्। तेन स्वाधिकरणावृत्तिः वृत्तिमांश्च योऽत्यन्ताभावस्तत्प्रतियोगिभूतं यद्यत्त्वं तद्भिन्नत्वमित्यर्थो निष्पन्नः। इत्थं च केवलान्वयित्वेनाभिमतं यदि स्वपदेन धर्तुं शक्येत तदाऽव्याप्तिः। संयोगाभावः आकाशाभावश्च न स्वपदेन धर्तुं शक्यौ, तयोः

प्रश्नः १—केवलन्वयिनो लिङ्गस्य लक्षणं स्वरूपं च वर्णनीयम्।

(१९१२, १९३१)

तदर्थत्वात् । [१]एकजातीयसम्बन्धेन सर्वत्र विद्यमानत्वं केवलान्वयित्वमिति नव्याः ।

(५०) केवलान्वयिनो लक्षणमाह--अन्वयेति । अन्वयेनैव व्याप्तिर्यस्मिन् स तथा । प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निराकरोति-अत्रेति । अभिधेयत्वसाध्यकानुमान इत्यर्थः । कुतस्तन्निषेधोऽतस्तत्र हेतुमाह-सर्वस्येति । पदार्थमात्रस्येत्यर्थः । तथा च सकलपदाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चाऽत्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वेन तदभावाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्न सम्भवत्येवेति भावः ॥

टी० – जिस लिङ्ग में केवल अन्वय व्याप्ति हो वह केवलान्वयि है । जैसे, 'घट अभिधेय है' क्योंकि इसमें प्रमेयत्व है ? दृष्टान्त-पट । यहां प्रमेयत्व और अभिधेयत्व की व्यतिरेक व्याप्ति नहीं है, क्योंकि सभी पदार्थों में प्रमेयत्व और अभिधेयत्व है ।

केवलव्यतिरेकिणः किं लक्षणम् ? तत्स्वरूपञ्च किम् ?--

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न

स्वपदेन ग्रहणे अग्रे अत्यन्ताभावपदेन क्रमेण संयोगाकाशावेव ग्राह्यौ । तच्च न सम्भवति संयोगस्य संयोगाभावात्मकस्वविरोधित्वाभावात्, आकाशस्य च आकाशाभावात्मकस्वविरोधित्वेऽपि वृत्तिमत्त्वाभावात् । तस्मात् स्वपदेन घटादेर्ग्रहणं तद्विरोधी वृत्तिमांश्च अत्यंताभावः घटाद्यभावः तत्प्रतियोगिभूतं यद्यत्स्वं घटादिकं तद्भिन्नत्वस्य अभिधेयत्वादौ संयोगाभावादौ च सत्वान्न क्वाप्यव्याप्तिः । न चात्र अभिधेयत्वसंयोगाभावआकाशाभावादिलक्ष्यव्यक्तिभेदेन लक्षणे । स्वपदग्राह्यं भिद्येतेति भ्रमितव्यम्, यत्र लक्ष्यस्यैव स्वपदग्राह्यत्वं-यथा स्वव्यापकसाध्यसामानाधिकरण्यं सद्धेतुत्वमित्यादौ-तत्रैव लक्ष्यभेदेन स्वपदग्राह्यस्य भेदात् प्रकृते तु स्वभिन्नत्वस्यैव लक्षणत्वेन लक्ष्यभिन्नस्यैव स्वपदग्राह्यत्वादिति ध्येयम् । स्वविरोधीत्यत्र प्रतियोगिव्यधिकरणत्वनिवेशस्तु सुखप्रतिपत्तिकरः ।

१ एकजातीयत्वञ्च स्वरूपसम्बन्धविशेषः ।

प्रश्नः १--केवलव्यतिरेकिणो हेत्वाभासस्य लक्षणमुदाहरणमुच्यताम् ।
(सन् १९००, १९०१, १९१५, १९२१)

प्रश्नः २—व्यतिरेकिणो हेत्वाभासस्य सोदाहरणं प्रतिपाद्यताम् (१९३२)

तद्गन्धवत्। यथा जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद्गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात्।

(न्या०) केवलव्यतिरेकिणो लक्षणमाह—व्यतिरेकेति। अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकित्वम्। यथा पृथिवीति। अत्र पृथिवीत्वावच्छिन्नं–पक्षः। पृथिवीतरजलाद्यष्टभेदः–साध्यः। गन्धवत्त्वं–हेतुः। अत्र 'यद्गन्धवत्तदितरभेदव'दित्यन्वयदृष्टान्ताभावाद्गन्धव्यापकेतरभेदसामानाधिकरण्यरूपान्वयव्याप्तिग्रहासम्भवात्। किन्तु 'यत्र यत्र पृथिवीतरभेदाभावस्तत्र तत्र गन्धाभावो यथा जलादिक'मिति व्यतिरेकदृष्टान्ते जलादावितरभेदाभावरूपसाध्याभावव्यापकता गन्धाभावे गृह्यते। इममेवार्थं मनसि निधाय 'यदितरेभ्यो न भिद्यते न तद्गन्धवत्, यथा जल'मिति ग्रन्थेन मूलकारो व्यतिरेकव्याप्तिमेव प्रदर्शितवान्। एवंप्रकारेण व्यतिरेकव्याप्तिग्रहानन्तरम्–'इतरभेदाभावव्यापकीभूताभावप्रतियोगिगन्धवती पृथिवी'त्याकारकव्यतिरेकिपरामर्शात्पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्नविधेयताका 'पृथिवी इतरभेदवती'त्याकारकानुमितिर्जायते इति तत्त्वम्। यथाश्रुतमूलार्थस्तु—यथा जलमिति। जलं इतरभेदाभाववत् इतरभेदाभावव्यापकत्वगन्धाभाववच्च। इत्येवम्प्रकारेण गन्धाभावनिरूपिता व्याप्यता इतरभेदाभावे गृह्यत इत्यर्थः। न चेयं तथा। इयं=पृथिवी, तथा=इतरभेदाभावव्यापकगन्धाभाववती न, किन्तु तदभावात्मकगन्धवती। तस्मान्न तथेति। तच्छब्देन गन्धाभावाभावरूपस्य गन्धस्य परामर्शेन 'तस्मा'दिति पञ्चम्यन्ताद् गंधाभावाभाववत्त्वादित्यर्थोपलब्धिः। तथा=इतरभेदाभाववती। न इत्यस्याभावः। तथा च इतरभेदाभावाभाववती इतरभेदवतीत्यर्थः।

(प०) केवलव्यतिरेकिणो लक्षणमाह—व्यतिरेकेति। व्यति-

रेकेणैव व्याप्तिर्यस्मिंस्तत्तथा । अन्वयव्यतिरेकिण्यतिव्याप्तिवारणाय मात्रेति । न चेयं तथेति । इयं=पृथिवी, न तथा=न गन्धाभाववतीत्यर्थः। तस्मान्न तथेति । गन्धाभाववत्त्वाभावादितरभेदाभाववती नेत्यर्थः । नन्वत्र किमिति नान्वयव्याप्तिरित्याशङ्क्य परिहरति—अत्रेति । इतरभेदसाधकानुमान इत्यर्थः । इदमुपलक्षणम् । जीवच्छरीरं सात्मकं[१] प्राणादिमत्त्वात् । यन्नैवम् तन्नैवम् । यथा घटः । प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यं, प्रमाकरणत्वात् यन्नैवम् तन्नैवम् । यथा प्रत्यक्षाभासः । विवादास्पदम् आकाशमिति व्यवहर्तव्यं शब्दवत्त्वादित्यादिकमपि केवलव्यतिरेकीति द्रष्टव्यम् ॥

टी०—जिसमें केवल व्यतिरेक व्याप्ति हो वह केवलव्यतिरेकि लिङ्ग है । जैसे, पृथिवी इतर पदार्थों (जलादि) से भिन्न है, क्योंकि इस (पृथिवी) में गन्ध है । जो इतर पदार्थों से भिन्न नहीं है उसमें गन्ध नहीं होता, जैसे जल । और यह (पृथिवी) वैसी (गन्धरहित) नहीं है । इसलिए वह इतर पदार्थों की तरह नहीं है । यहां 'जो गन्ध वाला है वह इतर पदार्थों से भिन्न है' ऐसा अन्वयदृष्टान्त नहीं है, क्योंकि पृथिवी मात्र को पक्ष बना लिया है ।

पक्षस्य किं लक्षणम् ?—

सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः ॥

(न्या०) पक्षलक्षणमाह—सन्दिग्धेति । साध्यप्रकारक[२]संदेहविशेष्यत्वं पक्षत्वम् । इदं च लक्षणमनुमितेः पूर्वं साध्यसन्देहे नियमेन जायत इत्यभिप्रायेण प्राचीनैः कृतम् । गगनविशेष्यकमेघप्रकारकसन्देहाभावदशायामपि गृहमध्यस्थपुरुषस्य घनगर्जितश्रवणेन 'गगनं मेघव'दित्याकारिकाया गगनत्वावच्छिन्नोद्देश्यतानिरूपितमेघत्वावच्छिन्नविधेयताकाया अनुमितेर्दर्शनात्प्राचीनलक्षणं

१ अत्रत्यमादिपदमिन्द्रियाणां ग्राहकम् ।

२ सन्देहश्च पर्वतो वह्निमान् न वेत्याकारकः ।

प्रश्नः १—पक्ष-सपक्ष-विपक्षाणां कानि लक्षणानि ? (१६३१)

विहाय नवीनैरनुमित्युद्देश्यत्वं [1]पक्षत्वमिति स्थिरीकृतम् ॥

(प०) अथ 'पृथिवीमात्रस्य पक्षत्वा' दित्यत्र किं नाम पक्षतेत्यपेक्षायां तां निर्वक्ति—सन्दिग्धेति। सपक्षवारणाय-सन्दिग्धेति।

टी० —जिसमें साध्यका सन्देह हो वह पक्ष है। जैसे धूम हेतु होने पर पर्वत पक्ष है।

सपक्षलक्षणं किम् ?—

निश्चितसाध्यवान् सपक्षः। यथा तत्रैव महानसम् ॥

(न्या०) सपक्षलक्षणमाह—निश्चितेति। साध्यप्रकारकनिनिश्चयविशेष्यत्वं सपक्षत्वम्। निश्चयश्च 'महानसं वह्निम' दित्याकारकः।

(प०) निश्चितेति। पक्षेऽतिव्याप्तिवारणाय निश्चेतेति। तत्रैवेति। धूमवत्त्वे हेतावेवेत्यर्थः ॥

टी०—जिसमें साध्य का निश्चय हो वह सपक्ष है। जैसे उसी स्थल में पाकशाला (सपक्ष है)।

विपक्षलक्षणं किम् ?—

निश्चितसाध्याभाववान् विपक्षः। यथा तत्रैव महाह्रदः॥

(न्या०) विपक्षलक्षणमाह—निश्चितसाध्याभावेति। साध्याभावप्रकारनिश्चयविशेष्यत्वं विपक्षत्वम्। निश्चयश्च 'ह्रदो वह्न्यभाववा' नित्याकारकः।

(प०) निश्चितेति। सपक्षेऽतिव्याप्तिवारणाय साध्येति। पक्षेऽतिव्याप्तिवारणाय निश्चितेति। तत्रैव=धूमवत्वे एव ॥

टी०–जिसमें साध्यके अभावका निश्चयहो वह विपक्ष है। जैसे उसी स्थानमें तालाब।

अथात्र हेत्वाभासाः निरूप्यन्ते—

।९७।

सव्यभिचार-विरुद्ध-सत्प्रतिपक्षाऽसिद्ध-बाधिताः पञ्च

---

१ प्राचीनोक्तलक्षणन्तु—सिषाधयिषाविरहविशिष्टसिद्ध्यभावत्वरूपमेव।

प्रश्नः १—हेत्वाभासाः के ? कानि च तेषामुदाहरणानि ? (१९१७, १९२५, १९२९, १९३६)

हेत्वाभासाः ॥

(न्या०) एवं सद्धेतून्निरूप्य हेत्वाभासान्निरूपयति—सव्यभिचारेति। हेतुवदाभासन्त इति हेत्वाभासाः। दुष्टहेतव इत्यर्थः। दोषाश्च व्यभिचार-विरोध-सत्प्रतिपक्षाऽसिद्धि-बाधाः। एतद्विशिष्टा हेतवो दुष्टहेतव इत्यर्थः। [1]यद्विषयकत्वेन ज्ञानस्यानुमितिस्तत्करणान्यतरप्रतिबन्धकत्वं तत्त्वं दोषसामान्यस्य लक्षणम्। हेतौ दोषज्ञाने सत्यनुमितिप्रतिबन्धो जायते, व्याप्तिज्ञानप्रतिबन्धो वा। अतो वादिनिग्रहाय वादिनोद्भाविते हेतौ दोषोद्भावनार्थं दुष्टहेतुनिरूपणमित्यर्थः। पर्वतोवह्निमान्, प्रमेयत्वादित्यत्र प्रमेयत्वहेतौ वह्न्यभाववद्वृत्तित्वरूपव्यभिचारे ज्ञाते वह्न्यभाववद्वृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम् ॥

(प०) हेतून्निरूप्य प्रसङ्गाद्धेत्वाभासानाह—सव्यभिचारेति। अत्रेदं बोध्यम्—अन्वयव्यतिरेकि तु पञ्चरूपोपपन्नं स्वसाध्यं साधयितुं क्षमते तानि कानीति चेच्छ्रूयताम्। पक्षधर्मत्वं सपक्षसत्त्वविपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति। अबाधितः साध्यरूपो विषयो यस्य तत्तथोक्तम्। तस्य भावस्तत्त्वम्। एवं साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्ष इत्युच्यते। स नास्ति यस्य सोऽसत्प्रतिपक्षः। तस्य भावस्तत्त्वमिति बोध्यम्। केवलान्वयि तु चतूरूपोपपन्नमेव स्वसाध्यं साधयितुं क्षमते तस्य विपक्षविपर्ययेण तद्व्यावृत्तिविपर्ययात् केवलव्यतिरेक्यपि तथा तस्य सपक्ष

---

१ अत्र तृतीयार्थः अवच्छिन्नत्वं तस्य प्रतिबन्धकत्वेऽन्वयः। ज्ञानस्येत्यत्र ज्ञानपदमनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयपरं षष्ठ्यर्थः वृत्तित्वं तस्य यद्विषयकत्वेऽन्वयः। तथा च अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तियद्विषयकत्वावच्छिन्नं प्रकृतानुमितितत्करणान्यतरप्रतिबन्धकत्वं तत्त्वं हेत्वाभासत्वमित्यर्थः। दोषविषयकज्ञानस्य प्रतिबन्धकत्वात् दोषविषयकत्वं प्रतिबन्धकतावच्छेदकं भवति प्रतिबन्धकता च दोषविषयकत्वावच्छिन्ना। यत्पदेन दोषस्य ग्रहणात्तत्वं दोषे।

प्रश्नः २—'वह्निरनुष्णः द्रव्यत्वा' दित्यत्र कः हेत्वाभासः ? किं च तस्य लक्षणम ? (१९३७)

विपर्ययेण तत्सत्त्वविपर्ययादिति। उपदर्शितरूपाणां मध्ये कतिपयरूपोपपन्नत्वात्। हेतुवदाभासन्ते इति हेत्वाभासाः। तत्त्वं चानुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वम्। बाधस्थले वह्निरनुष्ण इत्यनुमितिप्रतिबन्धकं यज्ज्ञानमुष्णत्ववद्वह्नावनुष्णत्वसाधकं द्रव्यत्वमित्याकारकं तद्विषयत्वास्य विषयतासम्बन्धेन द्रव्यत्वरूपहेत्वाभासे [1]सत्वाल्लक्षणसमन्वयः। सद्धेतुवारणाय यथार्थेति। घटादिवारणाय अनुमितितत्करणप्रतिबन्धकेति। व्यभिचारिणि अव्याप्तिवारणाय तत्करणान्यतरेति।

टी०—[जो वास्तव में हेतु न हो किन्तु हेतु के समान प्रतीत होता है उसे हेत्वाभास कहते हैं।] हेत्वाभास पांच तरह का होता है-सव्यभिचार, विरुद्ध, सत्प्रतिपक्ष, असिद्ध और बाधित।

सव्यभिचारस्य हेत्वाभासस्य किं लक्षणं, के च भेदाः ?—

सव्यभिचारो[2]ऽनैकान्तिकः। स त्रिविधः साधारणासाधारणानुपसंहारिभेदात्।

टी०—सव्यभिचार को अनैकान्तिक कहते हैं। वह तीन प्रकार का है, साधारण, असाधारण और अनुपसंहारि।

साधारणस्य हेत्वाभासस्य किं लक्षणम् ?—

तत्र साध्याभाववद्वृत्तिः [3]साधारणोऽनैकान्तिकः।

---

१ वह्निमान् प्रमेयत्वादित्यादौ व्यभिचारिस्थलेऽपि पर्वतो वह्निमानित्याद्यनुमितिकरणं वह्निव्याप्यं प्रमेयत्वमित्यादिज्ञानं तत्प्रतिबन्धकत्वञ्च वह्न्यभाववद्वृत्ति प्रमेयत्वमित्यादि ज्ञाने तद्विषयत्वञ्च प्रमेयत्वादौ हेताविति समन्वितं लक्षणम्।

२ बालव्युत्पत्तये प्राचीनसंकेतं दर्शयितुमाह—अनैकेति। अनैकान्तिकत्वञ्च साधारणाद्यन्यतमत्वरूपत्वम्।

३ अयं साधारणोऽपि साध्यसामानाधिकरण्यरूप-व्याप्तिग्रहस्य प्रतिबन्धः।

प्रश्नः१—अनैकान्तिकहेत्वाभासः कतिविधस्तस्य लक्षणं च किम् ? (१९२१)
प्रश्नः२—सव्यभिचारपदार्थः कतिविधः कानि वा तेषामुदाहरणानि ?
(१९१२, १९३५)

यथा पर्वतो वह्निमान् प्रमेयत्वादिति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ॥

(प०) तत्रेति । साधारणादित्रितयमध्य इत्यर्थः । अथ विरुद्धेऽतिप्रसक्तिरितिमास्म दूष्यः, सपक्षवृत्तित्वस्यापि निवेशात् । अथैवमपिस्वरूपासिद्धे दूषणं जागर्तीति मा वह गर्वं [1]पक्षवृत्तित्वस्यापि तथात्वात् ॥

टी०—साध्यके अभावमें भी रहने वाले हेतु को साधारण हेतु कहते हैं । जैसे पर्वत में वह्नि है क्योंकि इसमें प्रमेयत्व रहता है । यहां प्रमेयत्व हेतु वह्न्यभावाधिकरण जलाशय में भी रहता है, इसलिए यह हेतु साधारण अनैकान्तिक हुआ ।

असाधारणाऽनैकान्तिकस्य किं लक्षणम् ?—

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः । यथा शब्दो नित्यः शब्दत्वादिति । शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति ।

(न्या०) असाधारण इति । सर्वपक्षव्यावृत्तत्वं निश्चितसाध्यवदवृत्तित्वम् । साध्यवदवृत्तित्वं च साध्यासामानाधिकरण्यम् । हेतौ साध्यसामानाधिकरण्ये निश्चिते साध्यासामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धः फलम् ॥

(प०) पक्षमात्रेति । सर्वे ये सपक्षा विपक्षास्तेभ्यो व्यावर्तत इति सपक्षविपक्षव्यावृत्तः । केवलव्यतिरेकवारणाय[2] तद्भिन्न इत्यपि देयम् ॥

---

१ तथा च पक्ष-सपक्ष-वृत्तित्वविशिष्टसाध्याभाववद्वृत्तिः साधारण इतिफलितोर्थः ।

२ तथा च अन्वयव्यतिरेकव्याप्तिशून्यत्वे सति पक्षमात्रवृत्तित्वमसाधारणत्वमिति फलितम् ।

प्रश्नः—३–साधारणाऽसाधारणाऽनुपसंहारिणां सोदाहरणानि लक्षणानि प्रदर्शनीयानि (१९३२)

प्रश्नः—४–सव्यभिचारस्य किं लक्षणं, कियन्तो भेदाः ? के च ते ? प्रत्येकमुदाहरणं देयम् । (१९३७)

टी०—जो हेतु सब सपक्षों और विपक्षों में न हो, केवल पक्षमात्र में हो, वह असाधारण है। जैसे, 'शब्द नित्य है' क्योंकि इसमें शब्दत्व रहता है। शब्दत्व सभी नित्य और अनित्य पदार्थों में न रह कर केवल शब्द में रहता है।

अनुपसंहारिणः किं लक्षणम् ?—

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति ॥

(न्या०) अनुपसंहारिणं लक्षयति—अन्वयेति । उभयत्र दृष्टान्ताभावादन्वयव्याप्तिज्ञानव्यतिरेकव्याप्तिज्ञानोभयसामग्री नास्तीत्यर्थः । सर्वस्यैव [२]पक्षत्वात्पक्षातिरिक्ताप्रसिद्धेरिति भावः ॥

(प०) अन्वयेति । केवलान्वयिन्यतिव्याप्तिवारणाय अन्वयेति । केवलव्यतिरेकिण्यतिव्याप्तिवारणाय व्यतिरेकेति । अत्रेति । उपदर्शितानुमान इत्यर्थः ॥

टी०—जिस (हेतु) में अन्वय और व्यतिरेक दृष्टान्त न हो वह अनुपसंहारी है। जैसे, 'सभी पदार्थ अनित्य हैं, क्योंकि सबमें प्रमेयत्व रहता है।' यहां सभी पदार्थ पक्ष के अन्तर्भूत हैं, इसलिए दृष्टान्त नहीं है।

विरुद्धलक्षणं निरूप्यताम् ?—

साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा शब्दोऽनित्यः कृतकत्वादिति । कृतकत्वं हि नित्यत्वाभावेना-

---

१ एष च व्यतिरेकव्याप्तिग्रहस्य प्रतिबन्धः ।

२ हेतुसाध्ययोर्यत्र निश्चयस्तस्य दृष्टान्तत्वात् यत्र साध्यसंशयस्तस्य पक्षत्वात् साध्यसन्देहवत्त्वस्य साध्यनिश्चयवत्त्वस्य च विरोधात् पक्षभिन्नस्यैव दृष्टान्तत्वादिति भावः।

प्रश्नः१— विरुद्धहेत्वाभासस्य किं लक्षणं, किं चोदाहरणम्? (१९०४)

प्रश्नः२—विरुद्धस्य सत्प्रतिपक्षस्य च लक्षणं सोदाहरणं निरूपय (१९२३)

प्रश्नः ३—विरुद्ध-सत्प्रतिपक्ष-स्वरूपासिद्ध-बाधितानां सोदाहरणानि लक्षणानि प्रदर्शनीयानि (१९३३)

ऽनित्यत्वेन व्याप्तम् ॥

(न्या०) विरुद्धं लक्षयति—साध्याभावव्याप्त इति । साध्याभावव्याप्तिः साध्याभावनिरूपितव्यतिरेकव्याप्तिः, साध्यव्यापकीभूताभावप्रतियोगित्वम् । तथा च पक्षविशेष्यकसाध्याभावव्याप्यहेतुप्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धः फलम् । एवं सत्प्रतिपक्षेऽपि । विरुद्ध–सत्प्रतिपक्षयोर्विशेषस्तु विरुद्धहेतोरेकत्वेन सत्प्रतिपक्षहेतोर्द्वित्वेन च ज्ञातव्यः ॥ सत्प्रतिपक्षे द्वौ हेतू, विरुद्धे एको हेतुरिति यावत् । साध्याभावसाधकहेतुः साध्यसाधकत्वेनोपन्यस्त इत्यसामर्थ्यसूचनमपि ॥

(प०) विरुद्धं लक्षयति—साध्येति । सद्धेतुवारणाय साध्याभावव्याप्त इति । सत्प्रतिपक्षवारणाय सत्प्रतिपक्षभिन्न इत्यपि बोध्यम् । कृतेति । कार्यत्वादित्यर्थः । कृतकत्वमिति । अनित्यत्वेन व्याप्तमिति । यद्यत्कृतकं तत्तदनित्यमिति । व्याप्तिर्भवत्येव तथेति भावः ॥

टी०—जो हेतु साध्याभाव में व्याप्त है उसे विरुद्ध कहते हैं । जैसे 'शब्द नित्य है क्योंकि उसमें कृतकत्व है।' यहां कृतकत्व हेतु नित्यत्वाभाव (अनित्यत्व) से व्याप्त है।

सत्प्रतिपक्षस्य लक्षणं निगद्यताम् ?—

साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः । यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत् । शब्दोऽनित्यः कार्यत्वाद्घटवत् ।

(प०) सत्प्रतिपक्षं लक्षयति—साध्येति यस्य=हेतोः साध्याभावसाधकं=साध्याभावस्यानुमापकं-हेत्वन्तरं=प्रतिपक्षो हेतुर्विद्यते स

१ सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वात्साक्षादनुमितिविरोधित्वन्तस्येति भावः ।

प्रश्नः१—सत्प्रतिपक्षहेत्वाभासस्य किं लक्षणं किं चोदाहरणम् ।
(१९०५, १९११, १९२२, १९३५)

हेतुः 'सत्प्रतिपक्षः' इत्यर्थः। अयमेव प्रकरणसम इत्युच्यते। विरुद्धवारणाय हेत्वन्तरं यस्येति। वह्न्यादिवारणाय [1]साध्याभावेति॥

टी०—जिस हेतु के साध्याभाव को सिद्ध करनेवाला दूसरा हेतु हो उसे सत्प्रतिपक्ष कहते हैं। जैसे 'शब्द नित्य है, क्योंकि उसमें श्रवणेन्द्रियग्राह्यत्व रहता है,' दृष्टान्त-शब्दत्व जाति। 'शब्द अनित्य है, क्योंकि उसमें कार्यत्व रहता है,' दृष्टान्त-घट।

कतिविधोऽसिद्धः ?—

असिद्धस्त्रिविधः। आश्रयासिद्धः, स्वरूपासिद्धो, व्याप्यत्वासिद्धश्चेति॥

(प०) असिद्धं विभजते—असिद्ध इति। आश्रयासिद्धान्यतमत्वमसिद्धत्वम्॥

टी०—असिद्ध तीन तरह का है—आश्रयासिद्ध, स्वरूपासिद्ध और व्याप्यत्वासिद्ध।

आश्रयासिद्धस्योदाहरणम्—

आश्रयासिद्धो यथा गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव॥

(न्या०) आश्रयासिद्ध इति। [2]आश्रयासिद्धिर्नाम पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्धिः। यथेति। अत्रारविन्दे गगनीयत्वाभावे निश्चिते गगनीयत्वविशिष्टारविन्दे सौरभ्यानुमितिप्रतिबन्धः फलम्॥

---

१ ननु साधकं हेत्वन्तरं यस्य स सत्प्रतिपक्ष इत्युक्तौ वह्न्यादिसाध्यसाधकस्य हेत्वन्तरस्य धूमादेः सत्त्वाद्वह्न्यादिसाध्य एव सत्प्रतिपक्षव्यवहारः स्यादतः साध्याभावपदोपादानम्।

२ आश्रयासिद्धश्च पक्षधर्मताज्ञानप्रतिबन्धकत्वम्।

प्रश्नः १—असिद्धस्य हेत्वाभासस्य भेदान् सोदाहरणान् प्रदर्शयत।
(सन् १९०२, १९२४, १९२७, १९३६)

प्रश्नः २—आश्रयासिद्धस्योदाहरणमुच्यताम्। (१९०७)

(प०) आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्पक्षकत्वम्। भवति हि अरविन्दत्वे गगनीयत्वरूपपक्षतावच्छेदकाभाववत्पक्षकत्वम्, अरविन्दरूपपक्षे गगनीयत्वविरहात्। ननु किमरविन्दे गगनीयत्व-विरहोऽत आह—अत्रेति। उपदर्शितानुमान इत्यर्थः।

टी०—आश्रयासिद्ध का उदाहरण—आकाशकमल सुगन्ध वाला है क्योंकि उसमें कमलत्व है, जैसे तालाब का कमल। यहां आकाशकमल रूप आश्रय ही असिद्ध है क्योंकि वह (आकाश में कमल) होता ही नहीं।

स्वरूपासिद्धस्योदाहरणम्—

स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्, रूपवत्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्॥

(न्या०) स्वरूपासिद्ध इति। स्वरूपासिद्धिर्नाम पक्षे हेत्वभावः। तथा च हेत्वभावविशिष्टपक्षज्ञानात्पक्षविशेष्यकहेतुप्रकारक-परामर्शानुपपत्त्या परामर्शप्रतिबन्धः फलम्॥

(प०) पक्षे हेत्वभावः स्वरूपासिद्धिः। सद्धेत्वभावेऽतिव्याप्तिवारणाय पक्षे इति। घटाद्यभाववारणाय हेत्विति। सोऽयं स्वरूपासिद्धः शुद्धासिद्ध[1]-भागासिद्ध-विशेषणासिद्ध-विशेष्यासिद्धभेदेन चतुर्विधः। तत्राद्यस्तूपदर्शित एव। द्वितीयो यथा—'उद्भूतरूपादिचतुष्टयं गुणः, रूपत्वा'दित्यत्र रूपत्वहेतोः पक्षैकदेशावृत्तित्वेन तस्य भागे स्वरूपासिद्धत्वम्। [2]तृतीयो

---

१ दुष्टलक्षणमपि हेत्वाभास एव। तथा हि—अव्याप्तलक्षणस्य भागासिद्धेरन्तर्भावः। असम्भवग्रस्तस्य च स्वरूपासिद्धेरन्तर्भावः। अतिप्रसक्तलक्षणस्य च व्याप्यत्वासिद्धेऽन्तर्भावः सिद्धसाधनस्य चाश्रयासिद्धेरन्तर्भाव इत्येवंरूपेण बोध्यम्।

२ वायुः प्रत्यक्षः स्पर्शवत्त्वे सति रूपवत्त्वादित्यत्र रूपत्त्वरूपविशेष्यस्य वायावभावेन तद्विशिष्टस्पर्शवत्वरूपविशेषणस्यापि वायावभावात्तस्य स्वरूपासिद्धत्त्वमक्षतमेवेति बोध्यम्।

प्रश्नः १—स्वरूपासिद्धहेत्वाभासस्य किमुदाहरणम्? (१९३१)

यथा—'वायुः प्रत्यक्षः, रूपवत्त्वे सति स्पर्शवत्त्वा'दित्यत्र रूपवत्त्व-विशेषणस्य वायाववृत्तेस्तद्विशिष्टस्पर्शवत्त्वस्यापि तथात्वेन तस्य स्वरूपासिद्धत्वं निर्वहति विशेषणाभावे विशिष्टास्याप्यभावात् । तुरीयो यथा—अत्रैव विशेषणविशेष्यवैपरीत्येन हेतुः । तस्य स्वरूपासिद्धत्वं तु विशेष्याभावप्रयुक्तविशिष्टाभावादिति बोध्यम् ।

टी०—स्वरूपासिद्ध का उदाहरण—शब्द गुण है क्योंकि उसमें चाक्षुषत्व है, जैसे रूप। यहां शब्द में चाक्षुषत्व (आंखों से देखा जाना) नहीं है, क्योंकि शब्द कान से सुना जाता है।

व्याप्यत्वासिद्धस्य तदन्तर्गतस्योपाधेश्च लक्षणम् । यथा—

सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । यथा पर्वतो धूमवान् वह्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः । तथाहि यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकत्वम् । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वम् । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् ।

(न्या०) व्याप्यत्वासिद्ध इति । प्रकृते धूमव्यापकत्व-

प्रश्नः १—व्याप्यत्वाऽसिद्धस्य लक्षणमुदाहरणं लक्षणसमन्वयश्चोच्यताम्—
(१६०१, १९२८)

प्रश्नः २—उपाधेर्लक्षणमुदाहरणं चोच्यताम् (१६०६,१९०८,१९२०,१६२६)

मार्द्रेन्धनसंयोगे गृहीतं चेद्धूमे आर्द्रेन्धनसंयोगव्याप्यत्वं गृहीतम्। एवं वह्नेरव्यापकत्वमार्द्रेन्धनसंयोगे गृहीतं चेद्वह्नौ तदव्याप्यत्वं गृहीतम् तदेव व्यभिचरितत्वम्। तथा चोपाधिव्यभिचरितत्वं साधनं गृहीतं चेदुपाधिभूतार्द्रेन्धनसंयोगव्याप्यधूमव्यभिचारित्वं गृहीतमेव। अनुमानप्रकारश्च पूर्वानुमानहेतुं पक्षीकृत्य 'वह्निर्धूमव्यभिचारी, धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात्, घटत्वादिवत्, यो यत्साध्यव्यापकव्यभिचारी स सर्वोऽपि साध्यव्यभिचारी'ति। एवंप्रकारेण प्रकृतानुमानहेतुभूते पक्षे साध्यव्यभिचारोत्थापकतया दूषकत्वमुपाधेः फलम्। तथा च धूमाभाववद्वृत्तित्वरूपधूमव्यभिचारे गृहीते वह्नौ धूमाभाववद्वृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम्॥

(५०) व्याप्यत्वासिद्धं निरूपयति—**सोपाधिक इति**। ननु कोऽयमुपाधिरत आह। **साध्येति**। साधनाव्यापक उपाधिरित्युक्ते शब्दोऽनित्यः कृतकत्वादित्यत्र सामान्यवत्त्वे[1] सत्यस्मदादिबाह्येन्द्रियग्रहणार्हत्वमप्युपाधिः स्यात्तदर्थं साध्यव्यापकत्वमुक्तम्। तावत्युक्ते सामान्यवत्त्वादिनाऽनित्यत्वसाधने कृतकत्वमुपाधिः स्यात्तदर्थं साधनाव्यापकत्वमुक्तम्। उपाधिभेदमादायासम्भववारणाय

१ ननु ध्वंसरूपकार्यत्वावच्छेदेन सामान्यवत्वमात्रस्यापि साधनाव्यापकत्वभिया तावन्मात्रमुपाधिरस्त्विवति चेन्न। उपाधिनिरूपितव्यापकत्वस्य हेतौ सद्भाव एव हेतुनिरूपिताऽव्यापकत्वस्योपाधौ सम्भवात्तस्यैवात्राऽभावात्। तथा हि—व्यापकत्वं नाम स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपम्। स्वपदस्य सामान्यवत्त्वरूपोपाधिपरत्वम् तत्समानाधिकरणवृत्त्यन्ताभावो गगनाद्यवच्छेदेन कृतकत्वात्यन्ताभावस्तत्प्रतियोगित्वमेव कृतकत्वरूपहेतोरित्यत आह—अस्मदादि बाह्येन्द्रियेति। तथा च नित्यानां सामान्यवतां गगनादीनामस्मदादिबहिरिन्द्रियग्रहणानर्हत्वात्सुवचं विशेषणम् योगिनां तत्तदिन्द्रिययोग्यसूक्ष्मपदार्थानामपि भानात्तद्वारणाय—अस्मदादीति। अन्तर्मन इन्द्रियेणात्मग्रहणात्तद्वारणाय—बाह्येन्द्रियेति। एवं ह्यस्मदादिबाह्येन्द्रियग्रहणार्हत्वमात्रस्योपाधित्वे सामान्याद्यवच्छेदेनोपाधेः सत्त्वात् हेतोश्चासत्त्वेन तत्रापि पूर्वोक्तरीत्या उपाधिनिरूपितव्यापकहेतावभावात् सामान्यवत्त्वविशिष्टबाह्येन्द्रियग्रहणार्हत्वं फलितमिति ध्येयम्।

व्यापकत्वशरीरेऽप्यत्यन्तपद[1]मादेयम् । साधनभेदमादाय साधनस्योपाधित्ववारणायांव्यापकशरीरेऽप्यत्यन्तपदमावश्यकं देयम् । सोयऽमुपाधिस्त्रिविधः—केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकश्चेति । तत्राद्य उपदर्शितः। एवं क्रत्वन्तर्गतिनी हिंसा अधर्मजनिका हिंसात्वात्, क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः । तस्य यत्राधर्मजनकत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता । यत्र हिंसात्वं तत्र न निषिद्धत्वमिति निषिद्धत्वमुपाधिः साधनाव्यापकः । क्रतुहिंसायां निषिद्धत्वस्याभावात् । 'न हिंस्यात्सर्वा भूतानि' इति सामान्यवाक्यतः 'पशुना यजेत्' इत्यादिविशेषवाक्यस्य बलीयस्त्वात् । अतो हिंसात्वं नोधर्मजनकत्वे प्रयोजकमपि तु निषिद्धत्वमेवेत्यादिकमपि द्रष्टव्यम् । द्वितीयो यथा—वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः । तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वं रूपे व्यभिचारात् । किन्तु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदवच्छिन्नबहिःप्रत्यक्षत्वं यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव । आत्मनि व्यभिचारवारणाय 'बहिः'पदम् । यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र नोद्भूतरूपत्त्वमिति साधनाव्यापकत्वं च वायावुद्भूतरूपविरहात् । तृतीयो यथा—ध्वंसो विनोशी जन्यत्वादित्यत्र भावत्वमुपाधिः, तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलसाध्यव्यापकत्वं, प्रागभावे भावत्वविरहात् । किन्तु जन्यत्वरूपसाधनावच्छिन्नविनाशित्वं यत्र तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेव । यत्र जन्यत्वं तत्र भावत्वमिति साधनाव्यापकत्वं च, ध्वंसे भावत्वविरहात् । एवं स श्यामो मित्रातनयत्वादित्यत्रशाकपाकजन्यत्वमुपाधिः । श्यामत्वस्य नीलघटेऽपि सत्त्वान्न केवलसाध्यव्यापकत्वं, किन्तु साधनावच्छिन्नसाध्यव्यापकत्व-

१ दत्तमित्यर्थः ।

मेव। अष्टमे पुत्रे शाकपाकजन्यत्वविरहेण साधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यम्।

टी०—जो हेतु उपाधि सहित हो उसे व्याप्यत्वाऽसिद्ध कहते हैं। जो साध्यका व्यापक होकर हेतु का अव्यापक हो वह उपाधि है। साध्य के अधिकरण में रहने वाले अभाव का जा प्रतियोगी न हो वह साध्य व्यापक कहलाता है। जो हेतु के अधिकरण में रहने वाले अत्यन्ताभाव का प्रतियोगी होता है वह साधनाव्यापक है। जैसे पर्वत अग्नियुक्त होने से धूम वाला है। यहा आर्द्रेन्धन संयोग (अग्नि में गीली लकड़ी का संयोग) उपाधि है। क्योंकि जहां जहां धूम है वहां वहां आर्द्रेन्धन का संयोग है, अतः वह (आर्द्रन्धन संयोग) साध्य (धूम) का व्यापक है और जहां जहां अग्नि है वहां वहां आर्द्रेन्धन संयोग नहीं है, जैसे आग से लाल लोहे के गोले में, आर्द्रेन्धन नहीं है। इसलिए वह उपाधि साधन का अव्यापक हुआ। इसलिए साध्य का व्यापक होकर हेतु का अव्यापक होने से आर्द्रेन्धनसंयोग उपाधि हुआ। उपाधि सहित होने से धूम का साध्य करने में वह्नि रूप हेतु व्याप्यत्वासिद्ध है।

बाधितस्य किं लक्षणम् ?—

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा वह्निरनुष्णो द्रव्यत्वादिति। अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम्॥

(न्या०) यस्येति। यस्य = हेतोः साध्यस्याभावः = साध्याभावः। स च प्रमाणान्तरेण = प्रत्यक्षादिप्रमाणेन निश्चितः स बाधितः इत्यर्थः। तथा च प्रात्यक्षिकसाध्यबाधितनिश्चये [1]जाते साध्यानुमितिप्रतिबन्धः फलम्। बाधितसाध्यकत्वाद्बाधितहेतुरित्युच्यते ॥ इति न्यायबोधिन्यामनुमानपरिच्छेदः॥

(प०) यस्येति। सद्धेतुवारणाय प्रमाणान्तरेणेति। घटादिवा-

---

१ बाधस्य ग्राह्याभावनिश्चयरूपत्वात्साक्षादनुमितिप्रतिबन्धः फलम्।

प्रश्नः १—बाधितहेत्वाभासस्य लक्षणमुदाहरणं चोच्यताम्।
(१९१३, १९३१, १९३५)

रणाय साध्येति । इति पदकृत्यकेऽनुमानखण्डः ।

टी०—जिस हेतु के साध्य का अभाव दूसरे प्रमाण से निश्चित हो वह बाधित है। जैसे, वह्नि अनुष्ण है क्योंकि इसमें द्रव्यत्व रहता है । यहां अनुष्णत्व साध्य है, उसका अभाव उष्णत्व, प्रत्यक्ष प्रमाण से सिद्ध है, इसलिए यह हेतु बाधित है ।

उपमानपरिच्छेदः ।

अथोपमानन्निरूपयति—

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः तत्करणं सादृश्यज्ञानम्। तथा हि कश्चिद्गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते ॥

(न्या०) उपमानं लक्षयति—उपमितिकरणमिति । उपमितिं लक्षयति—संज्ञासंज्ञीति । संज्ञा नाम पदम् । संज्ञी अर्थः । तयोः सम्बन्धः शक्तिः । तथा च [1]पदपदार्थसम्बन्धज्ञानमुपमितिरित्यर्थः ।

---

१ ननु पद-पदार्थसम्बन्धज्ञानस्यैवोपमितित्वे व्याकरणादेरपि पद-पदार्थसम्बन्धग्राहकत्वादुपमितित्वापत्तिस्तस्मात्सादृश्यज्ञानकरणत्वेन पदपदार्थसम्बन्धज्ञानस्योपमितित्वं वाच्यम् । पद-पदार्थयोः सम्बन्धस्यैव शक्तिपदार्थत्वम् । व्याकरणादेरेव चोक्तरूपं शक्तिग्राहकत्वमिति निखिलतन्त्रसिद्धम् । तदुक्तम्—

शक्तिग्रहं व्याकरणोपमानं कोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥" इति ।

प्रश्नः १—उपमानप्रमाणस्य प्रयोजनं स-स्वरूपं प्रदर्शनीयम् (१९१२)
प्रश्नः २—उपमानस्य किं फलं, कया प्रणाल्या तद्भवति ? (१९२०)
प्रश्नः ३—उपमितिस्वरूपमुपवर्ण्य तदुत्पत्तिः कया प्रक्रियया भवतीति निरूप्यताम् । (१९३७)

उपमानं नामातिदेशवाक्यार्थज्ञानम्। अतिदेशवाक्यार्थस्मरणं व्यापारः। उपमितिः फलम्। 'गोसदृशो गवयपदवाच्यः'–इत्याकारकवाक्याद्गोसादृश्यावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकं यज्ज्ञानं जायते तदेव करणम् ॥ इति न्यायबोधिन्यामुपमानपरिच्छेदः ॥

(प०) अवसरसंगतिमभिप्रेत्याऽनुमानानन्तरमुपमानं निरूपयति-उपमिति। उपमितेः करणमुपमानमित्यर्थः। कुठारादिवारणाय-मितीति। प्रत्यक्षादिवारणाय उपेति। संज्ञासंज्ञीति। अनुमित्यादि-वारणाय सम्बन्धेति। संयोगादिवारणाय संज्ञासंज्ञीति। असौ गवयपदवाच्य इति। अभिप्रेतो गवयो गवयपदवाच्य इत्यर्थः। तेन गवयान्तरे शक्तिग्रहाभावप्रसंग इति दूषणमपास्तम्। तथा च गोसादृश्यविशिष्टपिण्डज्ञानं करणम्। अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः। उपमितिः फलमिति सारम्। तच्चोपमानं त्रिविधं-सादृश्यविशिष्टपिण्डज्ञानम्, असाधारणधर्मविशिष्टपिण्डज्ञानं, वैधर्म्यविशिष्टपिण्डज्ञानञ्च। तत्राद्यमुक्तमेव। द्वितीयं यथा-'खड्गमृगः कीदृगि'तिपृष्टे नासिकालसदेकशृङ्गोऽनतिक्रान्तगजाकृतिश्चेति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे तादृशं पिण्डं पश्यन्नतिदेशवाक्यार्थं स्मरति। तदनन्तरं खड्गमृगपदवाच्य इत्युपमितिरुत्पद्यते। अत्र नासिकालसदेकशृङ्ग एव असाधारणधर्मः। तृतीयं यथा—'उष्ट्रः कीदृगि'तिपृष्टे अश्वादिवदसमानपृष्ठो न ह्रस्वग्रीवशरीरश्चेति आप्तोक्ते कालान्तरे तत्पिण्डदर्शनाद्वैधर्म्यविशिष्टपिण्डज्ञानं ततोऽतिदेशवाक्यार्थस्मरणं तत उष्ट्र उष्ट्रपदवाच्य इत्युपमितिरुत्पद्यते ॥ इति पदकृत्यके उपमानखण्डः ॥

टी०—उपमिति का करण उपमान है। पद और पदार्थ इन दोनों का सम्बन्ध ज्ञान ही उपमिति है। उस (उपमिति) का करण सादृश्य ज्ञान है। जैसे, किसी मनुष्य ने जो गवय शब्द का अर्थ नहीं जानता था, जंगल में रहने वाले किसी मनुष्य से "गवय गाय की तरह होता है" यह सुना और वन में जाकर उक्त वाक्यार्थ को स्मरण करते हुए गौ के समान किसी जन्तु को देखा तब 'यह गवय शब्द वाच्य है' ऐसी उपमिति होती है।

शब्दपरिच्छेदः ।

अथ शब्दादीनां लक्षणं निरूप्यते—

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । यथा गामानयेति । शक्तं पदम् । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः ॥

(न्या०) [2]शब्दं लक्षयति—आप्तेति । आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम् । प्रमाणशब्दत्वं लक्ष्यतावच्छेदकम् । वाक्यत्वमात्रोक्तावनाप्तोच्चरितवाक्येऽतिव्याप्तिरत 'आप्तोच्चरितत्व' निवेशः । तावन्मात्रोक्तौ जबगडदशादावतिव्याप्तिरतो वाक्यत्वम् । आप्तत्वं च प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम् । तथा च प्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वमिति पर्यवसन्नोऽर्थः । वस्तुतस्तु । पदज्ञानं करणम् । वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिर्व्यापारः । वाक्यार्थज्ञानं शाब्दबोधः फलम् । वृत्तिर्नाम शक्तिलक्षणान्यतररूपा । शक्तिर्नाम घटादिविशेष्यकघटादिपदजन्यबोधविषयत्वप्रकारक ईश्वरसंकेतः ईश्वरसंकेतो नाम ईश्वरेच्छा । सैव शक्तिरित्यर्थः । शक्तिनिरूपकत्वमेव पदे शक्तत्वम् । विषयतासम्बन्धेन शक्त्याश्रयत्वं शक्यत्वम् ।

१ आप्तवाक्यत्वं यथार्थवक्तृपदसमूहत्वं वा शब्दस्य लक्षणम् । एतन्निष्कृष्टलक्षणन्तु न्यायबोधिन्यामेव स्पष्टम् । तच्च आप्तोच्चरितत्वे सति वाक्यत्वम् । आप्तत्वस्य च प्रयोगहेतुभूतयथार्थज्ञानत्वरूपत्वात् प्रयोगहेतुभूतयथार्थज्ञानजन्यत्वं वेति बोध्यम् ।

२ कुण्डलितः पाठः प्रक्षिप्तः, प्राचीनलिखितपुस्तकेष्वभावात् ।

३ एतच्च प्रमाणनिरूपणप्रस्तावाल्लब्धम् । पूर्ववाक्ये शब्दस्य लक्षणमित्यस्य प्रमाणशब्दस्य लक्षणमित्यर्थ इति भावः ।

४ प्रयोगेति । 'अर्थं बुद्ध्वा वाक्यं प्रयुंक्ते' इति नियमात् वाक्यप्रयोगात्पूर्वं प्रयोक्तुस्तदर्थज्ञानस्य आवश्यकत्वात् तस्य वाक्यप्रयोगहेतुत्वं बोध्यम् ।

प्रश्नः १—शक्तिः सप्तपदार्थातिरिक्ता न वेति विविच्य लक्षणस्य लक्षणं सपदकृत्यं सोदाहरणं लेख्यम् (१९२२)

शक्यसम्बन्धो लक्षणा । सा द्विविधा-गौणी, शुद्धा चेति । गौणी नाम सादृश्यविशिष्टे लक्षणा । यथा 'सिंहो माणवक' इत्यादौ सिंहपदस्य सिंहसादृश्यविशिष्टे लक्षणा । शुद्धा द्विविधा । जहल्लक्षणा, अजहल्लक्षणा चेति । लक्ष्यतावच्छेदकरूपेण 'लक्ष्यमात्रबोधप्रयोजिका लक्षणा जहल्लक्षणा । यथा 'गङ्गायां घोष' इत्यत्र गङ्गापदवाच्यप्रवाहसम्बन्धस्य तीरे सत्त्वात्तादृशशक्यसम्बन्धरूपलक्षणाज्ञानाद्गङ्गापदात्तीरोपस्थितिः । लक्ष्यतावच्छेदकरूपेण लक्ष्य-शक्योभयबोधप्रयोजिका लक्षणा-अजहल्लक्षणा । यथा 'काकेभ्यो दधि रक्ष्यता'मित्यत्र काकपदस्य दध्युपघातके लक्षणा । लक्ष्यतावच्छेदकं दध्युपघातकत्वम् । तेन रूपेण दध्युपघातकानां सर्वेषां काक-विडाल-कुक्कुट-सारमेयादीनां शक्यलक्ष्याणां सर्वेषां बोधात् । [1]जहदजहल्लक्षणा वेदान्तिनां मते । [सा च शक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रबोधप्रयोजिका यथा 'तत्त्वमसी'त्यत्र सर्वज्ञत्व-किंचिज्ज्ञत्व-परित्यागेन व्यक्तिमात्रबोधनात्]

(प०) अवसरसंगतिमभि त्योपमानानन्तरं शब्दं निरूपयति-आप्तेति । शब्द इति । शब्दप्रमाणमित्यर्थः । भ्रान्त-विप्रलम्भकयोर्वाक्यस्य शब्दप्रमाणत्ववारणाय आप्तेति । ननु कोऽयमाप्त इत्यत आह-आप्तस्त्विति । यथार्थवक्ता=यथाभूताऽबाधितार्थोपदेष्टा । वाक्यं लक्षयति—वाक्यमिति । घटादिसमूहवारणाय पदेति । शक्तमिति । निरूपकतासम्बन्धेन शक्तिविशिष्टमित्यर्थः । अस्मादिति । 'घटपदाद्घटरूपोऽर्थो बोद्धव्य' इतीश्वरेच्छैव शक्तिरित्यर्थः । अर्थस्मृत्यनुकूलपदपदार्थसम्बन्धत्वं तल्लक्षणम् । शक्तिरिव लक्षणापि पदवृत्तिः । अथ केयं लक्षणा ? शक्यसम्बन्धो लक्षणा । सा

---

१ अत्र वृत्तौ विशिष्टवाचकशब्दस्यैकदेशं विहायैकदेशे विद्यमानत्वात् सोऽयं देवदत्त इति वाक्ये पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वम् । यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वम्पदवाच्येनान्तःकरणविशिष्टेनानैक्यादैक्यसिद्ध्यर्थमुपाधिद्वयविनिर्मुक्ते चिन्मात्रे लक्षणेति ।

च त्रिधा । जहत्-अजहत्-जहदजहद्भेदात् । वर्तते च 'गङ्गायां घोष' इत्यत्र गङ्गापदशक्यप्रवाहसम्बन्धस्तीरे । लक्षणाबीजं च तात्पर्यानुपपत्तिः । अत एव प्रवाहे घोषतात्पर्यानुपपत्तेस्तीरे लक्षणा सेत्स्यति । 'छत्रिणो यान्ती'त्यादौ द्वितीया । 'सोऽयमश्व' इत्यादौ तृतीया ।

टी०—आप्तपुरुष का वाक्य शब्द प्रमाण है । ठीक २ बात कहनेवाला आप्त है । पदों का समूह वाक्य होता है । जैसे 'गाय लाओ' । शक्तिविशिष्ट को पद कहते हैं । 'इस पद से यह अर्थ समझना चाहिए' ऐसा जो ईश्वर का संकेत है उसका नाम शक्ति है ।

वाक्यार्थज्ञाने को हेतुः—

[1]आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः ।

टी०—आकांक्षा, योग्यता और सन्निधि वाक्यार्थ समझने में हेतु है ।

---

१ आकांक्षादियुक्तस्थले शाब्दबोधप्रकारो यथा—

घटमानयेत्यादौ घटपदार्थस्य घटस्य निष्ठत्वसम्बन्धेनाऽर्थे कर्मत्वेऽन्वयः । आङ्पूर्वकनीधातोरानयनमर्थः । तत्र निरूपकत्वसम्बन्धेन कर्मत्वस्यान्वयः । कृतिश्चाख्यातार्थः । तत्राऽनुकूलतासम्बन्धेनाऽऽनयनस्यान्वयः । आश्रयत्वसम्बन्धेन पुरुषे कृतेरन्वयस्तथा चायं शाब्दबोध-घटनिष्ठकर्मतानिरूपकानयनानुकूलकृतिमान् पुरुषः । इति ।

एवं तण्डुलं पचतीत्यत्रापि तण्डुलपदार्थस्य तण्डुलपदेनोपस्थितिः । द्वितीया कर्मत्वरूपफलस्योपस्थितिः । वृत्तित्वं च संसर्गः । पचधातुना पाकस्योपस्थितिस्तत्रानुकूलत्वसम्बन्धेन तादृशकर्मत्वस्यान्वयः । कृतेश्चाख्यातेनोपस्थितिस्तत्रानुकूलत्वसम्बन्धेन तादृशपाकस्यान्वयः । ततश्चैत्रपदेन चैत्रोपस्थितिः । तत्राश्रयत्वसम्बन्धेन कृतेरन्वयस्तथा च तण्डुलवृत्तिकर्मतानुकूलस्याश्रयश्चैत्र इति बोधः ।

एवं चैत्रेण तण्डुल इत्यादौ चैत्रपदेन चैत्रोपस्थितिः । तृतीयया कृत्युपस्थितिः । वृत्तित्वं संसर्गः । ततः पचधातुना पाकोपस्थितिः । जन्यत्वं संसर्गः ततः कर्माख्यातेन फलोपस्थितिः । जन्यत्वं सम्बन्धः । तण्डुलपदेन च तण्डुलपदार्थोपस्थितिः । तत्राश्रयत्वसम्बन्धेन फलस्यान्वयस्तथा च चैत्रवृत्तिकृतिजन्यपाकजन्यफलशाली तण्डुल-इति शाब्दबोधः । एवमन्यत्राप्यूह्यम् ।

प्रश्नः १—वाक्यार्थज्ञाने कानि कारणानि ? (१६०९, १९१८, १६२५)
प्रश्नः २—वाक्यार्थज्ञाने के हेतवः ? तेषां लक्षणान्युदाहरणानि च स्पष्टीकुरु । (१९२३, १६२७, १६३३, १६३६)
प्रश्नः १—आकांक्षालक्षणं ब्रूत (१९०८)
प्रश्नः २—आकांक्षाया लक्षणं प्रयोजनं च किम् (१९१३)

आकांक्षा-योग्यता-सन्निधीनां कानि लक्षणानि ?—

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा अर्थाऽबाधो योग्यता। पदानामविलम्बेनोच्चारणं संन्निधिः। तथा च आकांक्षादिरहितं वाक्यमप्रमाणम्। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम्, आकांक्षाविरहात्। वह्निना सिञ्चेदिति न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं, सान्निध्याभावात्।

(न्या०) आकांक्षां लक्षयति—पदस्येति। अव्यवहितोत्तरत्वादिसम्बन्धेन यत्पदे यत्पदप्रकारकज्ञानव्यतिरेकप्रयुक्तो यादृशशाब्दबोधाभावस्तादृशशाब्दबोधे तत्पदे तत्पदवत्त्वमाकांक्षा। यथा 'घट-' मित्यादिस्थलेऽव्यवहितोत्तरत्वादिसम्बन्धेनाम्पदं घटपदवदित्याकारकाऽम्पदविशेष्यकघटपदप्रकारकज्ञानसत्त्वे 'घटोयं कर्मत्व'मिति बोधो जायते। 'अम्' 'घट' इति विपरीतोच्चारणे तु तादृशज्ञानाभावात्तादृशशाब्दबोधो न जायते। अतस्तादृशाकांक्षाज्ञानं शाब्दबोधे कारणम्। अर्थाबाध इति। बाधाभावो योग्यतेत्यर्थः। 'अग्निना सिञ्चे'-दित्यत्र सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयसत्त्वान्न तादृशवाक्याच्छाब्दबोधः। सन्निधिं निरूपयति—पदानामिति। असहोच्चारितानि विलम्बोच्चारितानि॥

(प०) असम्भववारणाय पदान्तरव्यतिरेकप्रयुक्त इति। पुनरसम्भववारणाय पदान्तरेति। अर्थेति। आकांक्षावारणाय अर्थेति। पदानामिति। असहोच्चारितेष्वतिव्याप्तिवारणाय अविलम्बेनेति।

१ यस्य पदार्थस्य येन पदार्थेन सहान्वयस्तात्पर्यविषयस्तयोरव्यवधानेनोपस्थितिः सन्निधिपदार्थः।

आकांक्षावारणाय पदानामिति । आकांक्षादिशून्यवाक्यस्यात्र प्रमाणत्वं निषेधयति—तथा चेति । आकांक्षादिकं शाब्दहेतुरित्युक्ते चेत्यर्थः । आकांक्षाद्युदाहरणं दर्शयति—यथेति ।

टी०—दूसरे पदके न रहने से एक पदका अन्वयबोधाजनकत्व ही आकांक्षा है। एक पदार्थ में दूसरे पदार्थ का सम्बन्ध रहना ही योग्यता है। पदों का बिना विलम्ब उच्चारण करना ही सन्निधि है। आकांक्षा, योग्यता और सन्निधि से रहित वाक्य प्रमाण नहीं होता। जैसे गाय घोड़ा आदमी, यह वाक्य प्रमाण नहीं है, क्योंकि इस वाक्य में आकांक्षा नहीं है। 'आग से सींचो' यह वाक्य भी प्रमाण नहीं है क्योंकि इसमें योग्यता नहीं है। एक एक पहर के बाद उच्चारण किए गए 'गायको' 'लाओ' आदि पद भी प्रमाण नहीं है क्योंकि इसमें सन्निधि नहीं है।

वाक्यभेदं प्रदर्शयते—

वाक्यं[1] द्विविधम्। वैदिकं, लौकिकं च। वैदिकं[2]मीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं[3] त्वाप्तोक्तं प्रमाणम्, अन्यदप्रमाणम् ॥

(न्या०) वैदिकमिति। वेदवाक्यमित्यर्थः। इदमुपलक्षणम्। वेदमूलस्मृत्यादीन्यपि ग्राह्याणि। लौकिकं त्विति। वेदवाक्यभिन्नमित्यर्थः। आप्तत्वं च प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम्।

इति न्यायबोधिन्यां शब्दपरिच्छेदः।

टी०—वाक्य दो तरह का होता है, वैदिक और लौकिक। वैदिक वाक्य ईश्वर वाक्य हैं। अतः वे सभी प्रमाण हैं। लौकिक वाक्य तो आप्त पुरुषोक्त ही प्रमाण होते हैं। इससे अतिरिक्त (अर्थात जो लौकिक वाक्य आप्त पुरुषोक्त नहीं है वह) प्रमाण नहीं है।

---

१ वाक्यमिति। वाक्यत्वञ्च—अर्थबोधकपदसमूहत्वम्।
२ वैदिकवाक्यत्वञ्च—ईश्वरोक्तत्वे सत्यर्थबोधकपदसमूहत्वम्।
३ लौकिवाक्यत्वञ्च-आप्तपुरुषोक्तत्वे सत्यर्थबोधकपदसमूहत्वम्। वेदवाक्यभिन्नत्वं वा।

प्रश्नः १—वाक्यं कतिविधं, तदर्थज्ञाने कानि कारणानि? (१९१६, १९३०)

शब्दज्ञानं निरूप्यते—

वाक्यार्थज्ञानं शाब्दज्ञानम् । तत्करणं शब्दः ॥

(५०) नन्वेतावता शाब्दसामग्री प्रपञ्चिता । प्रमाविभाजकवाक्ये शाब्दस्याप्युद्दिष्टत्वेन तत्कुतो न प्रदर्शितमित्यत आह-वाक्यार्थेति। शब्दत्वं च शब्दात्प्रत्येमीत्यनुभवसिद्धा जातिः । शाब्दबोधक्रमो यथा—'चैत्रो ग्रामं गच्छती'त्यत्र ग्रामकर्मकगमनानुकूलवर्तमानकृतिमांश्चैत्र इति शाब्दबोधः । द्वितीयायाः कर्मत्वमर्थः । धातोर्गमनम् । अनुकूलत्वं च संसर्गमर्यादया भासते । लटो वर्तमानत्वमाख्यातस्य कृतिः । तत्सम्बन्धः । संसर्गमर्यादया भासते । 'रथो गच्छती'त्यत्र गमनानुकूलव्यापारवान् रथ इति शाब्दबोधः । 'स्नात्वा गच्छती'त्यत्र गमनप्रागभावावच्छिन्नकालीनस्नानकर्ता गमनानुकूलवर्तमानकृतिमानिति शाब्दबोधः । क्त्वाप्रत्ययस्य कर्ता पूर्वकालीनत्वं चार्थः । एवमन्यत्रापि वाक्यार्थो बोध्यः । इति पदकृत्ये शब्दपरिच्छेदः ।

टी०—वाक्य का अर्थ समझना ही शाब्दज्ञान है । उसका करण शब्द है ।

अयथार्थानुभवः कतिविधः ?—

अयथार्थानुभवस्त्रिविधः, संशय-विपर्यय-तर्कभेदात् ।

टी०—अयथार्थ अनुभव तीन तरह का है । संशय, विपर्यय और तर्क ।

संशयस्य किं लक्षणम् ?—

एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वेति ॥

१ साधारणधर्मधीजन्यत्वेनाऽसाधारणधर्मधीजन्यत्वेन विप्रतिपत्तिजन्यत्वेन च भेदेन संशयस्य त्रैविध्यं भवति । संशयमात्रे हि विरुद्धकोटिद्वयस्मरणपूर्वकविशेषादर्शनस्य

प्रश्नः १—अयथार्थानुभवस्य सोदाहरणान् भेदान् ब्रूत (१९०३, १९११, १९२३)
प्रश्नः २—संशयस्य लक्षणं सोदाहरणमुच्यताम् (१९०२, १९०५, १९०७, १९०८, १९३७)

(न्या०) यथार्थानुभवं निरूप्यायथार्थानुभवं विभजते—संशयेत्यादिना। एकेति। एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभावप्रकारकज्ञानं संशय इत्यर्थः। भावद्वयकोटिकसंशयाप्रसिद्धेः स्थाणुर्वेत्यत्र स्थाणुत्व-स्थाणुत्वाभाव-पुरुषत्व-पुरुषत्वाभाव कोटिक एव ॥

(प०) अयथार्थानुभवं विभजते—अयथार्थेति। संशयं लक्षयति—एकस्मिन्निति। एकस्मिन्धर्मिणि=एकस्मिन्नेव पुरोवर्तिनि पदार्थे विरुद्धाः=व्यधिकरणा ये नानाधर्माः-स्थाणुत्व-पुरुषत्वादयस्तेषां वैशिष्ट्यं=सम्बन्धः, तदवगाहि ज्ञानं संशय इत्यर्थः। घटपटाविति समूहालम्बनज्ञानस्य घटत्व-पटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिवारणाय एकस्मिन्निति। घटः पृथिवीति ज्ञानस्यैकस्मिन्धर्मिणि घटे घटत्व-पृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसङ्गवारणाय विरुद्धेति। पटत्वविरुद्धघटत्ववान् घट इति ज्ञानेऽतिप्रसक्तिवारणाय नानेति।

टी०—एक विशेष्य में परस्पर विरुद्ध अनेक धर्मों का ज्ञान ही संशय कहलाता है। जैसे 'यह स्थाणु (ठूँठ पेड़) या मनुष्य'।

विपर्ययस्य किं लक्षणम् ?—

मिथ्याज्ञानं विपर्ययः। यथा शुक्तौ 'रजतम्' इति ॥

(न्या०) मिथ्याज्ञानमिति। अयथार्थज्ञानमित्यर्थः। विपर्ययो नाम भ्रमः।

(प०) मिथ्येति। यथार्थज्ञानवारणाय मिथ्येति। अयथार्थवारणाय ज्ञानेति।

टी०—मिथ्याज्ञान विपर्यय कहलाता है। जैसे-सीप में 'यह चांदी है' ऐसा ज्ञान।

हेतुत्वम्। त्रिविधेषु संशयेषु मध्ये आद्यस्योदाहरणम्मूल एवाभिहितम्। तत्र साधारणधर्मत्वञ्च पुरुषत्वनिश्चायकशक्तिमत्त्वम्। द्वितीयस्योदाहरणं यथा—शब्दत्वं नित्यानित्यव्यावृत्तं शब्दमात्रवृत्तीतिज्ञानशब्दो नित्यो न वेति। तृतीयस्योदाहरणं यथा—प्रामाण्यं स्वतो ग्राह्यं परतो वेति।

तर्कलक्षणं निरूप्यते—

व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति ॥

(न्या०) व्याप्यारोपेणेति । तर्के [2]व्याप्यस्य व्यापकस्य च बाधनिश्चयः कारणम् । [3]अन्यथा बाधनिश्चयाभाव [4]इष्टापत्ति-दोषेण [5]तर्कानुत्पत्तेः ।

(प०) तर्कं लक्षयति—व्याप्यारोपेणेति । असम्भववारणाय व्याप्यारोपेणेति । पुनरसम्भववारणाय व्यापकारोप इति । अत्र वह्न्यभावो व्याप्यः धूमाभावो व्यापकः । यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागोऽनुचितः, तथापि प्रमाणानुग्राहकत्वात् स उदित

---

१ व्याप्यस्यारोप आहार्यज्ञानमित्यर्थः । आहार्यज्ञानञ्च बाधकालीनेच्छाजन्यम् । व्याप्यस्य यत् बाधकालीनेच्छाजन्यरूपाऽऽहार्यज्ञानन्तस्य व्यापके आरोपकस्तर्क इत्यर्थः। उदाहरणं यथा—यदि वह्निर्न स्यादिति । अत्र हि वह्न्यभावरूपव्याप्यस्याऽऽरोपेण व्यापको धूमाभाव आरोप्यते । व्यापकत्वं नाम, अधिकदेशवृत्तित्वम् । व्याप्यत्वं च अल्पदेशवृत्तित्वम् । अस्ति ह्येतदयोगोलकाधिकरणवृत्तिसत्त्वाऽसत्त्वाभ्यां धूमाभाव-वह्न्यभावयोरिति । एतादृशरूपेणास्य विषयपरिशेषकत्वम् । व्यभिचारसंशयनिवर्तकत्वं यथा—यदि धूमो वह्निव्यभिचारी स्यात् । तदा वह्निजन्यो न स्यादित्येतादृशरूपेणेति । अत्रापि वह्निव्यभिचारित्वं वह्निजन्यत्वाभावव्याप्यत्वम् ।

२ यदि वह्निर्न स्यात्तदा धूमोऽपि न स्यादित्यादिस्थले व्याप्यस्य वह्न्यभावस्य व्यापकस्य धूमाभावस्य च व्यतिरेकविधिनिश्चयः धूमसत्त्वेन वह्निसत्त्वनिश्चयः कारण-मित्यर्थः ।

३ आहार्यज्ञानरूपव्याप्यव्यापकयोर्विपरीतबाधनिश्चयाऽभावे ।

४ धूमोऽपि मा भवत्वितीष्टापत्तिदोषेणेत्यर्थः ।

५ तर्कत्वरूपानुपपत्तेरित्यर्थः ।

प्रश्नः १—संशय–विपर्ययोः को भेदः ? सप्तपदार्थमध्ये कुत्र अनयोरन्तर्भावः ? (१९१२)

प्रश्नः २—संशय–विपर्यय-तर्काणां लक्षणानि प्रदर्श्यन्ताम् (१९२८)

प्रश्नः १—तर्कस्य किं लक्षणम् ? (१९३०)

इति बोध्यम् । स्वप्नस्तु पुरीतद्बहिर्देशान्तर्देशयोः सन्धौ इडानाड्यां वा मनसि स्थितेऽदृष्टविशेषेण धातुदोषेण वा जन्यते । स च मानसविपर्ययान्तर्भूतः ।

टी०—व्याप्य के झूठे ज्ञानसे व्यापक का मिथ्या ज्ञान करना तर्क कहलाता है। जैसे 'यदि आग न हो तो धुंआ भी न हो।'

कतिविधा स्मृतिः ?—

स्मृतिरपि द्विविधा । यथार्था, अयथार्था च । प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था ॥

टी०—स्मृति भी दो तरह की है—यथार्थ और अयथार्थ । जो स्मृति यथार्थ ज्ञानसे उत्पन्न हो वह यथार्थ और जो अयथार्थ ज्ञानसे हो वह अयथार्थ ।

सुखं निरूपयति—

सर्वेषामनुकूलवेदनीयं सुखम् ॥

(न्या०) सुखं निरूपयति—सर्वेषामिति । इतरेच्छाऽनधीनेच्छाविषयत्वमिति निष्कर्षः । यथा श्रुते अनुकूलत्वप्रकारकवेदनाविशेष्यत्वस्य घटोऽनुकूल इत्याकारकज्ञानदशायामनुकूलत्वप्रकारकज्ञानविशेष्यत्वस्य घटादावपि सत्त्वाद्घटादावतिव्याप्तिरिति निष्कृष्टलक्षणमुक्तम् । भोजनादावतिव्याप्तिवारणाय इतरेच्छानधीनेतीच्छाविशेषणम् । सुखेच्छायाः सुखत्वप्रकारकज्ञानमात्रजन्यत्वात् ।

(प०) सुखं निरूपयति—सर्वेषामिति । सर्वात्मनोमनुकूलमिति वेद्यं यत्तत्सुखमित्यर्थः । 'अहं सुखी'त्यनुभवसिद्धसुखत्वजातिमत्, धर्ममात्रासाधारणकारणो गुणो वा सुखम् । शत्रुदुःखवारणाय सर्वेषामिति।

टी०—जो सबको अनुकूल लगे वह सुख है ।

---

१ अनुकूलवेदनीयत्वे सति गुणत्वं सुखत्वमिति लक्षणं घटादावतिव्याप्तमतो निष्कृष्टलक्षणम्बोध्यम् । तच्चेतरेच्छानधीनेच्छाविषयत्वे सति गुणत्वमित्येतद्रूपम् । लक्षणान्तरं च पदकृत्ये द्रष्टव्यम् ।

प्रश्नः १—स्मृतिः कतिविधेति सविस्तरमुपपाद्यताम् । (१९२८)

दुःखं निरूपयति—

प्रतिकूलवेदनीयं दुःखम् ॥

(न्या०) दुःखं निरूपयति—प्रतिकूलेति । अत्रापीतरद्वेषानधीनद्वेषविषयत्वमिति निष्कृष्टलक्षणम् । 'द्वेषविषयत्व'मात्रोक्तौ सर्पादावतिव्याप्तिः, तत्रापि द्वेषविषयत्वसत्त्वात्, अतस्तत्रातिव्याप्तिवारणाय 'इतरद्वेषानधीने'ति द्वेषविशेषणम् । सर्पजन्यदुःखादौ द्वेषात्सर्पेऽपि द्वेष इति सर्पद्वेषस्य सर्पजन्यदुःखद्वेषजन्यत्वादन्यद्वेषजन्यद्वेषविषयत्वरूपदुःखलक्षणस्य सर्पादौ नातिव्याप्तिः । फलेच्छा उपायेच्छाम्प्रति करणम् । अतः फलेच्छावशादुपायेच्छा भवति । एवं फले द्वेषादुपाये द्वेषः ॥

(प०) प्रतिकूलेति । दुःखत्वजातिमत्, अधर्ममात्रासाधारणकारणो गुणो वा दुःखम् । पदकृत्यं पूर्ववत् ॥

टी०—जो सबको बुरा लगे वह दुःख है ।

इच्छा-द्वेष-प्रयत्नानां लक्षणानि—

इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ॥

(प०) इच्छां निरूपयति-इच्छेति । काम इति पर्यायः । इच्छात्वजातिमती इच्छा । सा द्विविधा-फलेच्छा, उपायेच्छा च । फलं सुखादिकम् । उपायो यागादिः । द्वेषं निरूपयति-क्रोध इति । द्वेषीत्यनुभवसिद्धद्वेषत्वजातिमान् द्विष्टसाधनताज्ञानजन्यगुणो वा द्वेषः । प्रयत्नं निरूपयति-कृतिरिति । प्रयत्नत्वजातिमान्प्रयत्नः । स त्रिविधः, प्रवृत्ति-निवृत्ति-जीवनयोनिभेदात् । इच्छाजन्यो गुणः प्रवृत्तिः । द्वेषजन्यो गुणो निवृत्तिः । जीवनादृष्टजन्यो गुणो जीवनयोनिः । स च प्राणसञ्चारकारणम् ।

टी०—कामना का नाम इच्छा है । क्रोधका नाम द्वेष है । कृति (उद्योग) का नाम प्रयत्न है ।

---

१ प्रतिकूलवेदनीयत्वे सति गुणत्वं दुःखत्वमित्यस्यापि निष्कृष्टलक्षणन्तु इतरद्वेषानधीनद्वेषविषयत्वे गुणत्वरूपम् । लक्षणान्तरं पदकृत्ये द्रष्टव्यम् ।

धर्मस्य किं लक्षणम् ?—

विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः ।

(न्या०) धर्माधर्मौ निरूपयति—**विहितेति** । वेदविहितेत्यर्थः । **निषिद्धेति** । वेदनिषिद्धेत्यर्थः ॥

(प०) धर्ममाह—**विहितेति** । वेदविहितेत्यर्थः । अधर्मवारणाय वेदविहितेति । यागादिक्रियावारणाय कर्मजन्य इति । स च कर्मनाशाजलस्पर्शकीर्तनभोगतत्त्वज्ञानादिना नश्यति । अधर्मलक्षणमाह—**निषिद्धेति** । वेदेनेत्यर्थः । धर्मवारणाय वेदनिषिद्धेति । वेदनिषिद्धक्रियावारणाय धर्मजन्य इति । स च भोगप्रायश्चित्तादिना नश्यति । 'एतावेव अदृष्ट'मिति कथ्येते, वासनाजन्यौ च । वासना च विलक्षणसंस्कारः ॥

टी०—(वेद) विहित कर्म से उत्पन्न अदृष्ट को धर्म कहते हैं । (वेद) निषिद्ध कर्म से उत्पन्न अदृष्ट को अधर्म कहते हैं ।

आत्ममात्रविशेषगुणाः के ?—

बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या जीवस्य ॥

(न्या०) **बुद्ध्यादयोऽष्टाविति** । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा इत्यर्थः ।

टी०—बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म और अधर्म—ये आठ आत्मा के विशेष गुण हैं । उनमें बुद्धि, इच्छा और प्रयत्न—ये तीन दो दो तरह के, नित्य और

१ वेदविहितकर्मजन्यत्वे सति गुणत्वं धर्मत्वम् ।
२ वेदनिषिद्धकर्मजन्यत्वे सति गुणत्वमधर्मत्वम् ।

प्रश्नः १—धर्माधर्मयोर्लक्षणमभिधीयताम् (१९३०)
प्रश्नः १—आत्ममात्रविशेषगुणत्वं प्रयोजनं च किम् ? (१९१३,१९३०)

अनित्य, होते हैं। ईश्वर की बुद्धि, इच्छा और प्रयत्न नित्य है। जीव की बुद्धि इच्छा और प्रयत्न अनित्य है।

संस्कारः कतिविधः ? तद्भेदान् वृत्तींश्चेति--

संस्कारस्त्रिविधः । वेगो, भावना, स्थितिस्थापकश्चेति । वेगः-पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना-आत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः, कटादि पृथिवीवृत्तिः ॥ इति गुणाः ॥

(न्या०) संस्कारं विभजते—संस्कार इति । भावनां लक्षयति—अनुभवेति । अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाया लक्षणम् । अत्रानुभवजन्यत्वे सतीति विशेषणानुपादाने आत्ममनःसंयोगेऽतिव्याप्तिरात्ममनःसंयोगस्य ज्ञानमात्रं प्रत्यसमवायिकारणत्वेन स्मृतिं प्रत्यपि कारणत्वादतस्तदुपादानम् । आत्ममनः—संयोगस्यानुभवजन्यत्वाभावान्नातिव्याप्तिः । तावन्मात्रे कृतेऽनुभवध्वंसेऽतिव्याप्तिः । ध्वंसं प्रति प्रतियोगिनः कारणत्वेनानुभवध्वंसस्याप्यनभवजन्यत्वात् । अतः स्मृतिहेतुत्वोपादानम् । अनुभवध्वंसे स्मृतिहेतुत्वाभावान्नातिव्याप्तिः । ([1]ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणता सकलतान्त्रिकमतसिद्धा । यथा दण्डविशिष्टबुद्धिं प्रति

१ कुण्डलितो ग्रन्थः प्रक्षिप्तः प्राचीनपुस्तकेष्वदर्शनात्, लेखस्यातिशिथिलत्वाच्च ।

प्रश्नः १—संस्कारः कतिविधः ? कुत्र च कीदृशः ? (१९०९, १९१५, १९१९, १९२१, १९२६, १९३४)

प्रश्नः २—संस्कारभेदाः सोदाहरणा लेखनीयाः । (सन् १९००)

प्रश्नः ३—संस्कारस्य कियन्तो भेदाः ? के च ते ? आत्मनि (जीवे) कः संस्कारः, मनसि च कः ? कस्मिन्द्रव्ये संस्कारो न भवति ? (१९३७)

प्रश्नः ४—भावनाख्यसंस्कारस्य लक्षणं ब्रूत (१९०४)

दण्डज्ञानस्य। दण्डविशिष्टबुद्धिर्नाम दण्डप्रकारकबुद्धिः। सा च दण्डी पुरुष इत्याकारिका। न हि दण्डमजानानः 'दण्डी पुरुषः' इति प्रत्येति। एवं च यत्रायं दण्ड इति प्रत्यक्षं जातं तदनन्तरं 'दण्डी पुरुष' इत्याकारकप्रत्यक्षमुत्पन्नं, तत्र 'दण्डी पुरुष' इत्याकारकप्रत्यक्षेऽतिव्याप्तिः। तद्धि स्वाव्यवहितपूर्वक्षणोत्पन्नदण्डज्ञानात्मकानुभवजन्यं, जनिष्यमाणे 'दण्डी पुरुष' इत्याकारकस्मरणे कारणं च, स्मृतिं प्रत्यनुभवस्य कारणत्वादिति चेत्। अत्र ब्रूमः—अनुभवजन्यत्वं हि अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वम्। तथा च दण्डप्रकारकबुद्धित्वावच्छिन्नकार्यतानिरूपितदण्डज्ञानकारणतायां न दण्डानुभवत्वमवच्छेदकं दण्डानुभवादिव दण्डस्मरणादपि दण्डप्रकारकबुद्धेरुत्पत्तेः। अतो दण्डप्रकारकबुद्धित्वावच्छिन्नं प्रति स्मरणासाधारणदण्डज्ञानत्वेनैव दण्डज्ञानस्य कारणतायाः स्वीकरणीयत्वेनानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्योक्तप्रत्यक्षेऽभावान्नातिव्याप्तिः। भावनायां तु लक्षणमिदं वर्तते। तथा हि—अनुभवेनैव भावनाख्यसंस्कारोत्पत्त्या भावनात्वावच्छिन्नं प्रत्यनुभवस्यानुभवत्वेनैव कारणतया, भावनात्वावच्छिन्नकार्यतानिरूपितानुभवनिष्ठकारणतायामनुभवत्वमवच्छेदकम्। अतोऽनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य भावनायां सत्त्वात्। नन्वेवं 'स्मृतिहेतुत्व'विशेषणवैयर्थ्यम्। तद्ध्यनुभवध्वंसेऽतिव्याप्तिवारणाय प्रागुपात्तम्। न हि यथोक्तानुभवजन्यत्वविवक्षायामनुभवध्वंसेऽतिव्याप्तिः प्रसज्यते। तथा हि—ध्वंसत्वावच्छि[न्नं] प्रति च तत्तत्प्रतियोगिव्यक्तेस्तद्व्यक्तित्वेनेत्येवं ध्वंसप्रतियोगिनो[ः] कार्यकारणभावः। तथा च ध्वंसनिष्ठकार्यतानिरूपिता याऽनुभवनिष्ठा कारणता तस्यां प्रतियोगित्वमवच्छेदकं तत्तद्व्यक्तित्वं च, न त्वनुभवत्वमपीत्यनुभवध्वंसेऽनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूपानुभवजन्यत्वविरहादिति चेत् न। स्मृतावतिव्याप्तिवारणायैव तदुपादानात्। तथा हि—स्मृतिं प्रत्यनुभव एव

कारणं, न तु स्मृतिरप्यतो घटस्मृतित्वावच्छिन्नं प्रति घटानुभवस्य घटानुभवत्वेनैव कारणत्वं, न तु घटज्ञानत्वेन । इत्थं चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य स्मृतौ विद्यमानत्वादतिव्याप्तिः उक्तविशेषणदाने तु स्मृतेः स्मृतिहेतुत्वाभावात्तद्व्युदासः ॥)

(५०) संस्कारं विभजते—संस्कारेति । सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान्संस्कारः । घटादिवारणाय गुणत्वव्याप्येति । संयोगादिवारणाय आत्मविशेषगुणोभयवृत्तीति । ज्ञानादिवारणाय सामान्येति । द्वितीयादिपतनासमवायिकारणं वेगः । रूपादिवारणाय द्वितीयादिपतनेति । कालादिवारणाय असमवायीति । भावनां लक्षयति—अनुभवेति । आत्मादिवारणाय प्रथमदलम् । अनुभवध्वंसवारणाय द्वितीयदलम् । स्थितिस्थापकमाह—अन्यथेति । पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्त्वं स्थितिस्थापकत्वम् । गन्धवत्वमादाय गन्धेऽतिव्याप्तिवारणाय संस्कारत्वव्याप्येति । भावनात्वमादाय भावनावारणाय पृथिवीसमवेतेति । स्थितिस्थापकरूपान्यतरत्वमादाय रूपवारणाय जातीति । इति गुणा इति । द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः । द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषणदलम् । सामान्यादावतिव्याप्तिवारणाय विशेष्यदलम् ॥

टी०—संस्कार तीन तरह का है—वेग, भावना और स्थितिस्थापक । वेग तो पृथ्वी, जल, वायु, तेज और मन इन पांचों में रहता है। जो अनुभव से उत्पन्न और स्मरण का कारण है उसका नाम भावना है। यह केवल आत्मा में रहती है। दूसरी अवस्था में गयी हुई वस्तु को पूर्वावस्था में लाने वाला संस्कार स्थितिस्थापक है। यह चटाई आदि पार्थिव पदार्थों में रहता है।

कर्मणः किं लक्षणम् ?—

चलनात्मकं कर्म ।

१ चलनात्मकत्वे सति गुणत्वं कर्मणो लक्षणम् । निष्कृष्टलक्षणन्तु संयोगभिन्नत्वे

प्रश्नः १—कर्मस्वरूपं प्रदश्य तद्भेदाः प्रदर्श्यन्ताम् (१६२४, १९२८)

ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् ॥

(प०) चलनेति । संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । हस्त-पुस्तकवारणाय सत्यन्तम् । घटादिवारणाय विशेष्यदलम् । ऊर्ध्वेति । अपक्षेपणवारणाय ऊर्ध्वेति । कालादिवारणाय असाधारणेत्यपि बोध्यम् । अधोदेशेति । उत्क्षेपणवारणाय अधोदेशेति । कालादिवारणाय असाधारणेत्यपि देयम् । शरीरेति । प्रसारणादिवारणाय शरीरसन्निकृष्टेति । कालादिवारणाय असाधारणं देयम् । विप्रकृष्टेति । उत्क्षेपणादिवारणाय विप्रकृष्टेति । कालादिवारणाय असाधारणमप्योवश्यकम् ।

टी०—चलने आदि क्रिया का नाम कर्म है । ऊर्ध्व देश में संयोग होने का कारण उत्क्षेपण (ऊपर फेंकना) है । नीचे की ओर संयोग का कारण अपक्षेपण (नीचे फेंकना) है । शरीर के समीप संयोग का कारण आकुञ्चन (समेटना) है । शरीर से दूर संयोग का कारण प्रसारण (फैलाना) है । इनसे भिन्न कर्म गमन (जाना) है ।

सामान्यस्य किं लक्षणम् ?—

नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । परं सत्ता । अपरं द्रव्यत्वादि ॥

(न्या०) सामान्यं निरूपयति—नित्यमेकमिति । नित्यत्वे

सति संयोगासमवायिकारणत्वरूपम् ।

१ ऊर्ध्वदेशसंयोगहेतुत्वे सत्यसाधारणत्वे च सति गुणत्वमुत्क्षेपणत्वम् ।

२ अधोदेशसंयोगहेतुत्वे सत्यसाधारणत्वे च सति गुणत्वमपक्षेपणत्वम् ।

३ शरीरसन्निकृष्टसंयोगहेतुत्वे सत्यसाधारणत्वे च सति गुणत्वमाकुञ्चनत्वम् ।

४ विप्रकृष्टसंयोगहेतुत्वे सत्यसाधारणत्वे च सति गुणत्वं प्रसारणत्वम् ।

५ कर्मादिप्रसारणान्तभिन्नत्वे सति गुणत्वं गमनत्वम् ।

प्रश्नः १—सामान्यस्य किं लक्षणम् ? कतिविधं च तत् (१९३२)

सत्यनेकसमवेतत्वं सामान्यलक्षणम् । 'नित्यत्व'विशेषणानुपादानेऽनेकसमवेतत्वस्य संयोगादौ सत्त्वात्तत्रातिव्याप्तिस्तद्वारणाय 'नित्यत्व'विशेषणम् । 'अनेकसमवेतत्वा'नुपादाने नित्यत्वमात्रोपादाने आकाशादावतिव्याप्तिस्तद्वारणायानेकसमवेतत्वम् । 'अनेकसमवेतत्वा'नुपादाने नित्यत्वविशिष्टसमवेतत्वमात्रोक्तावाकाशगतैकत्वपरिमाणादौ, जलपरमाणुगतरूपादौ चातिव्याप्तिः । जलपरमाणुगतरूपादेराकाशगतैकत्वपरिमाणादेर्नित्यत्वात् समवेतविशेषणम् ।

(प०) नित्यमिति । संयोगादिवारणाय नित्यमिति । कालादिपरिमाणवारणाय अनेकेति । अनेकानुगतत्वं च समवायेन बोध्यम् । तेन नात्यन्ताभावेऽतिव्याप्तिः ॥

टी०—नित्य और एक होकर अनेक पदार्थों में रहनेवाला सामान्य कहलाता है । वह सामान्य द्रव्य, गुण और कर्म में रहता है । सब से अधिक देश में रहने वाली जाति है सत्ता । द्रव्यत्व आदि जाति सत्ता से न्यून देशमें रहती है ।

विशेषस्य किं लक्षणम्—

नि[1]त्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ॥

(प०) नित्यद्रव्यवृत्तय इति । घटत्वादिवारणाय नित्यद्रव्यवृत्तय इति । आत्मत्वमनस्त्ववारणाय आत्मत्वमनस्त्वभिन्ना इत्यपि बोध्यम् ।

टी०—नित्य द्रव्यों में रहते हुए जो दूसरों को व्यावृत्त करें वे विशेष हैं ।

समवायस्य किं लक्षणम् ?—

नि[2]त्यसम्बन्धः समवायः । अयुतसिद्धवृत्तिर्ययोर्द्वयो-

१ नित्यद्रव्यवृत्तित्वे सति व्यावर्तकत्वे च सत्यात्ममनस्त्वभिन्नत्वं विशेषत्वम् ।

२ नित्यत्वे सति सम्बन्धत्वं समवायत्वम् ।

प्रश्नः १—विशेषस्य, समवायस्य च, किं लक्षणम् ? कानि च नित्यद्रव्याणि ? (१९३२)

प्रश्नः १—समवायस्य किं लक्षणम् ? (१९२९)

र्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ॥

(न्या०) समवायं निरूपयति—नित्येति । सम्बन्धत्वं विशिष्टप्रतीतिनियामकत्वम् । तावन्मात्रोक्तौ संयोगेऽतिव्याप्तिरतो नित्य इति विशेषणम् । (ययोर्द्वयोर्मध्य इति । यन्निष्ठकालनिरूपिताधेयतासामान्यं यदवच्छिन्नं तदुभयान्तरत्वमयुतसिद्धत्वमित्यर्थः ॥)

(प०) नित्येति । आकाशादिवारणाय सम्बन्ध इति । संयोगवारणाय नित्येति । स्वरूपसम्बन्धवारणाय तद्भिन्न इत्यपि बोध्यम् ।

टी०—नित्य सम्बन्ध का नाम समवाय है । वह अयुत सिद्ध पदार्थों में रहता है। जिन दो में एक पदार्थ, जब तक वह विनष्ट नहीं हो तब तक दूसरे के बिना न रह सके, वे दोनों अयुत सिद्ध कहलाते हैं । जैसे अवयव और अवयवी, गुण और द्रव्य, क्रिया और द्रव्य, जाति और व्यक्ति, विशेष और नित्य द्रव्य ।

प्रागभावस्य किं लक्षणम् ?—

अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य ॥

---

१ प्रागभाव इति । कार्योत्पत्तिपूर्वकालावच्छेदेनाऽनादित्वे सति सान्तत्वे च सति अभावत्वम् प्रागभावत्वम् ।

प्रश्नः १—येषां पदार्थानां समवायसम्बन्धः सम्भवति ते पदार्था निर्दिश्यन्ताम् (१९३४)

प्रश्नः २—अयुतसिद्धयोः किं लक्षणम् (१९३१)

प्रश्नः ३—जातिः कति विधा ? सा कुत्र वर्तते ? किं च तस्या लक्षणम् ? (१९३४)

प्रश्नः ४—जातेः किं लक्षणम् ? त्रिषु द्रव्यगुणकर्मसु का जातिर्वर्तते ? का वा केवलं द्रव्यसामान्ये वर्तते (१९३५)

प्रश्नः ५—पृथ्वीगन्धयोः, घटघटत्वयोः परमाणुविशेषपदार्थयोश्च कः सम्बन्धः ? स सम्बन्धोऽन्यत्र वर्तते न वा ? वर्तते चेत्कुत्र ? (१९३५)

प्रश्नः १—चतुर्विधानामभावानां लक्षणान्युदाहरणानि च लिख्यन्ताम् । (१९२४)

(प०) प्रागभावं लक्षयति—अनादिरिति । घटादिवारणाय प्रथमदलम् । परमाणुवारणाय द्वितीयदलम् । पुनः प्रागभावः कस्मिन्कालेऽस्तीत्यत आह—उत्पत्तेरिति । कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवायिकारणे वर्तते इत्यर्थः ।

टी०—जिस अभाव का आदि न हो और अन्त हो उसे प्रागभाव कहते हैं। जैसे कार्य की उत्पत्ति के पहले का अभाव।

प्रध्वंसस्य किं लक्षणम् ?—

सादिरनन्तः प्रध्वंसः । उत्पत्त्यनन्तरं कार्यस्य ॥

(प०) ध्वंसं लक्षयति—**सादिरिति**। घटादिवारणाय अनन्त इति । आत्मादिवारणाय सादिरिति । उत्पत्तीति । कार्यस्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणवृत्तिरित्यर्थः । स च 'ध्वस्तः' इति प्रत्ययविषयः ॥

टी०—जिस अभाव का आदि तो हो पर अन्त न हो उसे प्रध्वंसाभाव कहते हैं। जैसे कार्य की उत्पत्ति के बाद का अभाव।

अत्यन्ताभावस्य लक्षणं निरूप्यते—

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा भूतले घटो नास्तीति ॥

(न्या०) अत्यन्ताभावं निरूपयति—त्रैकालिकेति । (प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वे सति—अन्योन्याभावभिन्नत्वे सति—अभावत्वम्-अत्यन्ताभावस्य लक्षणम् ।) ध्वंसप्रागभावान्योन्याभावाकाशादीनां वारणाय यथाक्रमं विशेषणोपादानम् । वस्तुत-

---

प्रश्नः २—प्रागभाव-प्रध्वंसाऽत्यन्ताभावाऽन्योन्याभावानां लक्षणानि प्रदर्श्यन्ताम् (१९३१)

प्रश्नः ३—ध्वंस-प्रागभावयोः किं लक्षणम् ? (१९३३, १९३५)

स्तु संसर्गाभाववत्वं तादात्म्यभिन्नसम्बन्धावच्छिन्नप्रतियोगिताका-भावत्वम्। ध्वंसप्रागभावयोश्च न संसर्गावच्छिन्नप्रतियोगिताकत्वमिति तेनैव तद्वारणे 'त्रैकालिके'ति स्वरूपाख्यानमेवेति बोध्यम्।

(प०) अत्यन्ताभावं लक्षयति—त्रैकालिकेति। त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। ध्वंसप्रागभाव-वारणाय त्रैकालिकेति। भेदवारणाय संसर्गेत्यादि।

टी०—जिस अभाव की प्रतियोगिता संसर्ग से अवच्छिन्न हो और भूत, भविष्यत् वर्तमान इन तीनों कालों में रहता हो उसे अत्यन्ताभाव कहते हैं। जैसे 'जमीन पर घड़ा नहीं है' यह अभाव।

अन्योन्याभावस्य किं लक्षणम्?

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्या-भावः। यथा घटः पटो नेति॥

(न्या०) अन्योन्याभावं निरूपयति—तादात्म्येति॥

(प०) अन्योन्याभावं लक्षयति—तादात्म्येति। प्रागभाव-प्रध्वंसाभाववारणाय तादात्म्येति। अत्यन्ताभाववारणाय तादात्म्य-त्वेन सम्बन्धो विशेषणीयः॥

टी०—जिसकी प्रतियोगिता तादात्म्य सम्बन्ध से अवच्छिन्न हो उसे अन्योन्याभाव कहते हैं। जैसे 'घड़ा कपड़ा नहीं है' यह अभाव।

पदार्थानुपसंहरति—

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम्।

प्रश्नः ४—अन्योन्याभावाऽत्यन्ताभावयोः सोदाहरणे लक्षणे निरूपणीये (१९३४)

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

इति श्रीमहामहोपाध्यायान्नम्भट्टविरचितस्तर्कसंग्रहः समाप्तः ॥

(न्या०) ननु सादृश्यादीनामतिरिक्तपदार्थानामनिरूपणेन न्यूनतेत्यत आह सर्वेषामिति । "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति न्यायस्यादिमसूत्रे उक्तानां प्रमाणप्रमेयादीनामित्यर्थः । विस्तरस्त्वन्यत्रानुसन्धेयः ।

इति श्रीगोवर्धनविरचिता तर्कसंग्रहस्य न्यायबोधिनी व्याख्या समाप्ता ॥

(प०) पदार्थज्ञानस्य परमप्रयोजनं मोक्ष इत्यामनन्ति । स च आत्यन्तिकैकविंशतिदुःखध्वंसः । आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम् । दुःखध्वंसस्येदानीमपि सत्त्वेनास्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनान्तम् । मुक्तयात्मकदुःखध्वंसस्यान्यदीयदुःखप्रागभावसमानकालीनत्वाद्वामदेवादीनां मुक्तात्मनामप्यमुक्तत्वप्रसंगात्स्वसमानाधिकरणेति प्रागभावविशेषणम् । दुःखानि चैकविंशतिः—शरीरं, षडिन्द्रियाणि, षड्विषयाः, षड् बुद्धयः, सुखं, दुःखञ्चेति । दुःखानुषङ्गित्वाच्छरीरादौ गौणदुःखत्वम् । तथा च 'आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेरात्मज्ञानसाधनानिदिध्यासनमननसाधनत्वं पदार्थज्ञाने संजाघटीति । एवं च तत्त्वज्ञाने सति शरीरपुत्रादावात्मत्वस्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः । तेन दोषाभावः, तेन प्रवृत्त्यनुत्पत्तिः, ततस्तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः । ततो जन्माभावः ।

'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ।

अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः ॥

इत्यादिवचनात् 'तमेव विदित्वातिमृत्युमेति' इति श्रुतेश्च, सगुणोपासना-काशीमरणादेरपि तत्त्वज्ञानद्वारा मुक्तिहेतुत्वम् । अत एव परमेश्वरः काश्यां तारकमुपदिशतीति सारम् ।

चक्रे चन्द्रजसिंहो हि पदकृत्यमिदं शुभम् ।
परोपकारकरणं माधवो वीक्षतामिदम् ॥

इति श्रीमत्तत्रभवद्गुरुदत्तसिंहशिष्यश्रीचन्द्रजसिंहविरचितं पदकृत्यम् ॥

टी०—सब पदार्थों का यथोचित रूपसे पूर्वोक्त सात पदार्थों में ही अन्तर्भाव हो जाता है । इस से सात ही पदार्थ हैं, यह सिद्ध हुआ ।

कणाद (वैशेषिक) और गौतम (न्याय) के मतमें बालकों की व्युत्पत्तिके लिए विद्वान अन्नम्भट्टने तर्कसंग्रह बनाया ।

इति श्रीमन्नालाल 'अभिमन्यु' एम० ए० कृता तर्कसंग्रहभाषाटीका समाप्ता ।

समाप्तः

विषयानुक्रमणिका ।

इति ।

मध्यमपरीक्षोपयोगिग्रन्थानां सूचीपत्रम् ।